आरण्यकम्  मार्च 2010  ISSN 0975 - 0061
अर्धवार्षिकं संस्कृतशोधपत्रम्  आर.एन.आई. सं.58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
   41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
   21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. वज्रभूषणमिश्र 'आक्रान्तः'
   51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
   51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
   60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
   204 रूप्यकाणि

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

**संस्कृतप्रसारपरिषद्**

**आरा (विहारः)**

संस्कृतप्रसारपरिषद्, आरा (विहार)
सरस्वती नः सुभगा मयस्करत्

**सप्तदशं वर्षम्, प्रथमोऽङ्कः**

**मार्च 2010**

## 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कं पञ्चाशत् (50) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चविंशतिः रूप्यकाणि वर्त्तते। शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम्।

   (क) धनादेश (M.O) द्वारा शुल्कप्रेषणं **श्री नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीरस्थान, मौलाबाग, आरा( विहार )-802301** दूरभाषः-09431451895 नाम्ना करणीयम्।

   (ख) बैंक ड्राफ्ट **'संस्कृतप्रसारपरिषद्'** इति नाम्ना **'आरा' ( विहारः )** नगरे व्यवहरणीयं कृत्वा **श्रीनीलमणि पाठकस्य** उपरिलिखिते (3.क इत्यत्र) सङ्केते प्रेषणीयम्।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते। अस्वीकृता लेखा निर्धारित-'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **डॉ. गोपबन्धु मिश्रः, प्रोफेसर, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्


वर्षाङ्कौ - सप्तदशं वर्षम्, प्रथमोऽङ्कः

चैत्रः, वि.सं. २०६७

मार्च, २०१०


संस्कृतप्रसारपरिषद्, आरा (विहार) सरस्वती नः सुभगा मयस्करत्


प्रतिवर्षं प्रकाशनकालः
चैत्रः, आश्विनः-विक्रमाब्दः
मार्च, सितम्बर

प्रत्यङ्कम् - २५ रूप्यकाणि
संयुक्ताङ्कः - ५० रूप्यकाणि
वार्षिकं शुल्कं ५० रूप्यकाणि

## परामर्शदात्री समितिः

डॉ. सुरेशचन्द्र गो. काण्टावाला, बड़ोदरा
डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

❀

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

❀

सम्पादकः
**प्रो.गोपबन्धु मिश्रः**
संस्कृतविभागः
काशी हिन्दू विश्वविद्यालयः, वाराणसी

❀

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**

❀

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
मारुतिमन्दिरम्
प्रकाशपुरी, आरा (विहारः) 802301

❀

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।


**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

## सम्पादकीयम्

अवस्थानम् अवस्था। देशकालाभ्याम् अवच्छिन्ना किं च अनवच्छिन्नेति अवस्थायाः भेदद्वयं कल्पयितुं शक्यते। देशविशेषस्य तद्गतस्थानस्य वा कस्यचित् स्थितिः 'तदवस्था' इति लोके व्यवह्रियते, तद्यथा–'जम्मू-कश्मीरप्रान्तस्य अवस्था नातिसुखावहा विद्यते' इत्यादि। एवं च कालगताऽवस्थापि प्रयुज्यते, तद्यथा–'प्राचीनकालगताऽवस्था समीचीनाऽऽसी'दित्यादि। देश–कालान्यतरानवच्छिन्नाऽपि अवस्था विविधैः प्रमाणैः ऊह्यते। यथा–अद्वैतवेदान्तदर्शने 'ब्रह्म सत्यं जगन्मिथ्या' इति साधयितुं देशकालाद्यनवच्छिन्नस्य सतो ब्रह्मणः अवस्थाकल्पनं प्रभवति। यद्यपि ब्रह्मब्रह्माण्डयोः आधेयाऽऽधारभावः कल्पयितुमयोग्यः तथापिं उपाधिभूतस्य कस्यचित् चेतनस्य अवस्थाकारणेन अचेतनमिदम् असद् जगद् उत्पद्यते, रज्जौ सर्पवत् प्रतीयमानं च भवतीति हेतोः चेतनस्य अवस्था अनस्वीकार्येति बोधः प्रवर्तते।

मानवजीवने कालावच्छिन्ना अवस्था चतुर्धेति सामान्यो विवेकः। ताश्चाऽवस्थाः सन्तिं–शैशवम्, कौमारम्, यौवनम्, जरा चेति। ताश्च षड्भिर्भावविकारैः सिद्ध्यन्तीत्यपि वक्तुं शक्यते। ते च भावविकाराः निरुक्तकारेण यास्काचार्येणैवम् उक्ताः–जायते, अस्ति, विपरिणमते, वर्धतेऽपक्षीयते विनश्यतीति। तांश्च भावविकारान् व्याचक्षाणेन तत्तद्भावविकारजन्या एकैका अवस्था ऊह्यते, तद्यथा–'जायते इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधति' (निरुक्तम्, १.१.२)। वस्तुतः भावविकाराणाम् एतत् पौर्वापर्यं देशकालकृतमेव गृह्यते, अन्यथा 'जायते' इत्यत्र जनिशब्दवाच्ये भावविकारे अस्तेरपि अर्थो विद्यते एव, यतो हि यः अविद्यमानः स कथं जायेत? यदा किञ्चिद् वस्तु विपरिणमते तदा तस्य अस्तित्वमपि अवश्यं स्वीकरणीयम्। तर्हि 'जायते' इत्यवस्थायाम् 'अस्ति' इत्यस्य सत्ता, 'अस्ती'त्यवस्थायां 'विपरिणमते' इत्यस्य स्थितिरिति एवं क्रमं पश्यामश्चेत् कथमेते जायते, अस्ति, विपरिणमते इत्यादयो भिन्ना भिन्ना भावविकारा गृह्येरन् इति विवेचनविषयम् ऊरीकृत्य दुर्गाचार्यः समाधत्ते यत् शब्दः एकार्थवृत्तिर्भवति। एकस्मिन् काले एकस्मिन् अर्थे वृत्तिः यस्य स तादृशः

शब्दः एकार्थवृत्तिः भवति। अतः यदा 'जायते' इति एष प्रयोगो विधीयते, तदा 'अस्ति' शब्दवाच्यः भावविकारः पूर्णतया विवक्षितो न भवति, अतः जायमानावस्थायां प्रयुज्यमानो 'जायते' इत्येष शब्दः वर्तमानमपि 'अस्तित्वं' नाभिधत्ते, तद्यथाऽऽह दुर्गाचार्यः–'न ह्यजातोऽस्तीत्युच्यते। नाप्यविद्यमानो विपरिणमत इति। तत्रैवं सति जायत इत्येष शब्दो जन्मैव केवलं ब्रवीत्यविवक्षितेतरभावविशेषम्। किं कारणम्? एकार्थवृत्तित्वाच्छब्दस्य। अस्तिशब्दवाच्यस्य भावविकारस्यासम्पूर्णत्वात्। अनवधृतरूपं हि तस्यामवस्थायां तद् भवत्यनुमानगम्यं किमपि जायत इति। तस्माज्जायत इत्येष शब्दो जायमानावस्थायामस्तित्वं विद्यमानमपि नाचष्टे।' (दुर्गा., निरुक्तम्, १.१.२)। अर्थात् भावविकारविशेषं द्योतयन्ती प्रत्येकं शैशव–कुमाराद्यवस्था आत्यन्तिकीं स्थितिम् अनभिधाय काञ्चित् सापक्षिकीं दशामेव बोधयति, शैशवादिशब्दस्य एकस्मिन् काले एकार्थवृत्तित्वात्। अतः शैशवे कौमारावस्थायां विद्यमानायां सत्यामपि 'शैशव' शब्दः कौमारं भावं नाचष्टे।

वेदान्तदर्शने जाग्रत्–स्वप्न-सुषुप्ति इति चेतनायाः अवस्थात्रयं वर्ण्यते। तत्रापि क्रमशः जाग्रदवस्थाऽपि 'जायते' इति वत् पूर्वभावस्यादिमाचष्टे, नापरभावम् अर्थात् न स्वप्नभावम् आचष्टे, न च प्रतिषेधति इति नैरुक्तसमयम् इव व्याख्यानं विधाय अवस्थाभेदानां सापेक्षं वैशिष्ट्यम् ऊरीकर्तुं शक्यते।

नाट्यं परिभाषमाण आचार्यधनञ्जय आह 'अवस्थानुकृतिर्नाट्यम्' (दशरूपकम्, १.७) इति, कीदृश्याः अवस्थायाः अनुकार इति जिज्ञासायां 'काव्योपनिबद्धधीरोदात्ताद्यवस्थानुकारश्चतुर्विधाभिनयेन तादात्म्यापत्तिर्नाट्यम्' इति आचार्यो धनिकः अवलोके व्याख्याति। अर्थात् अभिनयद्वारा कस्यचित् रामसीताद्यन्यतमस्य तात्कालिकस्थितेरिव स्थितेरुपन्यास एव नाट्यम्। कीदृश्येषा अवस्था या अनुकर्त्तुं शक्यते? तच्चाऽनुकरणं दृष्टस्य ज्ञातपूर्वस्य वा चरित्रविशेषस्य अवस्थाया इति न, किन्तु पूर्णतया काल्पनिकय कस्यचित् चरितस्यापि भवतीत्यतः सा अवस्था बौद्धिकी, न तु शारीरिकीति ऊह्नीयमेव। अतिपरिचितां परिणीतां प्रेयसीमपि शकुन्तलाम् अपरिचिन्वतोऽत्यन्तमशिष्टस्य दुष्यन्तस्य वचनानि श्रुत्वा शकुन्तलायाः कीदृशी अवस्था उदपद्यत, तामवस्थां पुरष्कृत्य कीदृशी वाणी तस्याः मुखात् निरगच्छत्, इत्यादिघटनाः कवेः साक्षात् पुरतः घटमानाः अदृष्टा अपि तत्तद्घटनागतानाम् अवस्थाविषये



परिकल्पनपरायणः कविः तत्तत्परिकल्पितावस्थाः यथा अनुकर्ता नटादिः अनुकुर्यात् तथा साहित्यम् उपन्यस्यति। अत्र अवस्थाविषपिणी कल्पना द्विधा परिलक्ष्यते। प्रथमा तावत् तत्तन्मुहूर्तगतासु घटनासु दुष्यन्तशकुन्तलादेः कीदृशी मानसिकी अवस्था कीदृशाश्च नेत्रवक्त्रादिविकाराः स्युरिति काल्पनिकघटनागतपात्राणां व्यवहारकल्पना। द्वितीया तावत् तां ताम् अवस्थां प्राप्नुवताम् अनुकार्याणां दुष्यन्तादीनां व्यवहारान् आङ्गिकान् वाचिकाँश्च विकारान् तत्तत्काव्यानुसन्धानबलात् किं च अभिनयकौशलशिक्षया भूयो भूयस्तदभ्यासेन च यथा नटः आत्मनि सम्यक् निर्वर्तयेत् तथा कल्पना। तद्यथा आचार्यश्रीशङ्कुकस्य रससूत्रविषयकं मतं विवृत्य काव्यप्रकाशकार आह–

"काव्यानुसन्धानबलाच्छिक्षाभ्यासनिर्वर्तितस्वकार्यप्रकटनेन नटेनैव प्रकाशितैः कारणकार्यसहकारिभिः कृत्रिमैरेव तथाऽनभिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः....." (का.प्र.चतुर्थ उल्लासः)

अत्रेदं वैशिष्ट्यं नाम नटगतं दुष्यन्तत्वं तथा च नटगतभुजाक्षेपादिविकाराः, रोमाञ्चवेपथ्वादयो भावाः कृत्रिमाः, किन्तु साधारणैः सहृदयैः एते नटगता अवस्थाविशेषाः कृत्रिमाः इति नाभिमन्यन्ते। अतः एका अवस्था तु वास्तविकदुष्यन्तादेः या मूलभूता कविना आत्मस्थभावेन कल्पिता, किं च अपराऽवस्थेयं नटगता या अवास्तविकी कृत्रिमा वा सत्यपि तथा सामाजिकैः न मन्यमानाऽस्ति। कविर्यथा प्रथमां दुष्यन्तादिगताम् अवस्थां कल्पते तथैव नटादिगतां कृत्रिमां किं च तथा अनभिमन्यमानामपि कल्पते इति कवेः कल्पनायाः कोटिद्वयं प्रवर्तत एव।

एवं च नाट्ये नायकादिभिः प्रारब्धस्य कार्यस्य पञ्च अवस्थाः भवन्ति, ताश्च–१. आरम्भः, २. प्रयत्नः, ३. प्राप्त्याशा, ४. नियताप्तिः, ५. फलागमः इति। अत्रापि पूर्वपूर्वापेक्षया उत्तरोत्तरा अवस्था सापेक्षधर्मवर्त्तिनी भवतीत्यूहितुं शक्यते।

नियतिकृतेषु नियमेषु सर्वस्याः अवस्थायाः परिवर्तनं भवत्येव। सुखदुःखयोरन्यतरं कियन्मात्रं दीर्घकालिकं भवतु नाम, तत् तदितरागमनेन परिवर्तते। तद्वत् शैशवाद्यवस्थाः अवस्थान्तरकारणेन अनित्या एव। यद्यपि प्रत्येकं शैशवाद्यवस्था तत्तद्गतविशिष्टगुणदोषयुक्ता भवति तथापि सा अवस्थान्तरं प्राप्नोतीति कारणेन तद्गताः गुणाः जनैः स्मर्यन्ते, दोषाश्च क्षम्यन्ते।

किन्तु, लक्षणग्रन्थेषु लक्षणानाम् स्थायिनी नित्या वाऽवस्था एवाऽपेक्षिता भवति, अतः तत्र अनवस्था (न अवस्था अर्थात् अवस्थाऽभावः) दोषाय कल्प्यते, न तु स्वभावाय अथवा गुणाय। तद्यथा काव्यप्रकाशे लक्षणामूलव्यञ्जनाव्यापारस्वीकार-प्रसङ्गे 'गङ्गायां घोषः' इत्यादिप्रयोगे शैत्यपावनत्वाद्यातिशय्यरूपं प्रयोजनमेव व्यङ्ग्यमिति निश्चीयते। तत्र तत् प्रयोजनं कथं न लक्ष्यं भवति, लक्षणावृत्त्या वा कथं तन्नावगम्यते इत्यत्र अनवस्थादोषं दर्शयम् आचार्यो मम्मटो वक्ति–

'एवमप्यनवस्था स्याद् या मूलक्षयकारिणी। एवं प्रयोजनं चेल्लक्ष्यते तत् प्रयोजनान्तरेण, तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृत् अनवस्था भवेत्।' (काव्यप्रकाशः, द्वितीय उल्लासः)

एवमेव नियतिकृतासु अवस्थासु अनवस्था अवस्थान्तरं वा गुणाय कल्प्यतां नाम, किन्तु अस्माकं जीवनं सुव्यवस्थितम् अनुशासितं वा यथा स्यादिति काङ्क्षमाणा वयं जीवनशास्त्रे काव्यशास्त्रादाविव अवस्थामेव वाञ्छामः, किं च अवस्थाऽभावम् अनवस्थां वा दोषरूपेण विवेचयाम एव।

समेषामस्माकं जीवनम् अनवस्थादोषरहितं यथा स्यात्तदर्थं विचारान् प्रकटयितुम् आरण्यकम् इदं यथा प्रवर्त्तेत, तथा तत्र लेखकपाठकादयः प्रमाणानि स्युरिति निवेदयति।

विदुषां वशवंदः
गोपबन्धु मिश्र
सम्पादकः



# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| १. काव्यपदप्रवृत्तिनिमित्तत्व-विमर्शः | डॉ. श्यामानन्द मिश्रः<br>उपाचार्यः, साहित्यविभागः<br>संस्कृतविद्याधर्मविज्ञानसंकायः,<br>काशी हिन्दू विश्वविद्यालयः,<br>वाराणसी | १ |
| २. अकथितश्चेति सूत्रार्थ-विमर्शः | डॉ. मनोज कुमार मिश्रः<br>संस्कृतविभागः<br>राँची विश्वविद्यालयः, राँची | ६ |
| ३. शिवराजविजये विरोधाभासालङ्कारः | डॉ. रंजना मिश्रः<br>अमरावतीनिवासः<br>महानगरकालोनी<br>अकबरपुर<br>जि. अम्बेदकरनगर (उ.प्र.) | १९ |
| ४. विभिन्नदार्शनिकाभिमत-शाब्दबोधविचारः | डॉ. दिव्यचेतन ब्रह्मचारी<br>अतिथ्यध्यापकः<br>व्याकरणविभागः<br>सम्पर्णानन्द संस्कृत विश्वविद्यालयः<br>वाराणसी | २५ |
| ५. उपनिषद्भावनायां शब्दब्रह्मस्वरूपविचारः | डॉ. ललिता चक्रवर्ती<br>आसोसिएट प्रोफेसर<br>संस्कृतपालिप्रकृतविभागः<br>विश्वभारती, शान्तिनिकेतनम् | ३७ |
| ६. रतिमन्मथनाटके मन्मथः | डॉ. श्रीप्रकाश रायः<br>व्याख्याता, संस्कृतविभागः<br>वीरकुँवरसिंहविवविद्यालयः, आरा | ४३ |

| | | |
|---|---|---|
| ७. प्राणविद्याग्रहणे उपनिषदीया उपायाः | पराम्बा श्रीयोगमाया<br>शोधच्छात्रा, संस्कृतविभागः<br>उत्कल विश्वविद्यालयः<br>वाणीविहारः, भुवनेश्वरम् (ओड़िसा) | ५३ |
| ८. वाल्मीकीये रामायणे राक्षसीपात्राणं त्रैगुण्य-विमर्शः | नीलमणि कुमार पाठकः<br>शोधच्छात्रः, संस्कृतविभागः<br>वीरकुँवरसिंहविवविद्यालयः,<br>आरा (विहारः) | ६३ |



# काव्यपदप्रवृत्तिनिमित्तत्वविमर्शः

डॉ.श्यामानन्दमिश्रः

काव्यपदस्य प्रवृत्तिनिमित्तं शब्दार्थयुगलत्वं वा शब्दमात्रत्वं वेत्ययं प्रश्न-स्त्वद्यावधि अनुत्तरित एव तिष्ठति। काव्यस्वरूपं प्रतिपादयत्सु काव्यशास्त्रिषु काव्यत्वं शब्दार्थोभयानुगतो धर्मः शब्दमात्रानुगतो वेत्यत्र सम्प्रतिपत्तिर्न दृश्यते। भामहरुद्रटवामनमम्मटभट्टादयः काव्यशास्त्रिणः काव्यपदस्य प्रवृत्तिनिमित्तं शब्दार्थ-युगले एवेति प्रतिपादयन्ति। एतेषां शब्दार्थोभयकाव्यतावादिनां मते आस्वादव्यञ्जकत्व-स्योभयत्राप्यविशेषात् शब्दमात्रे कविसंरम्भगोचरत्वायोगाच्च काव्यत्वं शब्दार्थयोरुभयोरपि व्यासक्तं, न पुनः शब्दमात्रवृत्ति इति। केचन दण्डि–जयदेव–पण्डितराजजगन्नाथादयः शब्दकाव्यतावादिनस्तु आस्वादव्यञ्जकत्वं रमणीयार्थेन समन्विते पदे पदसमूहे वा तिष्ठतीति लक्ष्यतावच्छेदकस्य शब्दमात्रवृत्तित्वमेव प्रतिपादयन्ति। शब्दमात्रस्य प्रवृत्तिनिमित्तत्वमिदम्प्रथमतया काव्यादर्शकृता दण्डिना प्रतिपादितम्–"शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली"[1] इति। अनेन इष्टेन मनोहारिणा अर्थेन समन्विते पदसमूहे काव्यत्वं तिष्ठतीत्यवगन्तव्यम्। अत्र इष्टार्थव्यवच्छिन्ना पदावली इत्यनेन काव्यपदस्य शब्दमात्रपरत्वमङ्गीकृतं काव्यादर्शकृतेति स्फुटमेव। अग्निपुराणकृतापि लक्ष्यतावच्छेदकस्य शब्दमात्रवृत्तित्वमेव प्रतिपादितम्–"संक्षेपाद्वाक्यमिष्टार्थव्यवच्छिन्ना पदावली"[2] इति। अत्रापि इष्टार्थविशिष्टः शब्द एव काव्यमिति स्पष्टम्। शब्दकाव्यतावादिष्वाचार्येषु रसगङ्गाधरकारः पण्डितराजजगन्नाथः सर्वप्रमुखः। काव्यपदप्रवृत्तिनिमित्तं शब्द एव न तु शब्दार्थयुगलम् इति प्रबलयुक्त्या प्रतिपादयता तेन निर्दिष्टं स्वाभिमतं काव्यलक्षणम्–"रमणीयार्थप्रतिपादकः शब्दः काव्यम्"[3] इति।

हेमचन्द्रोक्तकाव्यलक्षणनिर्देशपुरस्सरं 'शब्दार्थौ' इति विशेष्यपदं खण्डयता शब्दमात्रस्य च काव्यत्वं प्रतिपादयतः पण्डितराजजगन्नाथेनोक्तम्–"यत्तु प्राञ्चः 'अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम्' इत्याहुः तत्र विचार्यते–शब्दार्थयुगलं न काव्यशब्दवाच्यं मानाभावात्। 'काव्यमुच्चैः पठ्यते,' 'काव्यादर्थोऽवगम्यते', 'काव्यं

श्रुतमर्थो न ज्ञातः' इत्यादिविश्वजीनव्यवहारतः प्रत्युत शब्दविशेषस्यैव काव्यपदार्थप्रतिपत्तेश्च"[4] इति। अस्यायमभिप्रायः शब्दार्थयोरुभयोरपि काव्यत्वस्वीकरणे अर्थस्यापि काव्यपदबोध्यत्वे सति उक्तलोकव्यवहाराणामनुपपत्तिः स्याद्, अतः शब्दविशेषस्यैव काव्यत्वं सिद्ध्यतीत्यवगन्तव्यम्। परन्त्वत्रेदं विचारणीयं यत् 'काव्यादर्शोऽवगम्यते', 'काव्यं श्रुतमर्थो न ज्ञातः' इत्यादिलोकव्यवहाराणां प्रयोक्ता कः? किं स सहृदयः यस्यानुभवः कविकर्मणः काव्यत्वाकाव्यत्वनिर्धारणे प्रमाणम्? सहृदयत्वं तु पुनः काव्यार्थभावनाक्षमस्यैव "सहृदयः काव्यत्वनिर्धारणक्षमः" इति न्यायात्। यस्यार्थावबोधे सामर्थ्यं नास्ति स खलु सहृदय एव भवितुं नार्हति। अतः काव्यत्वनिर्धारणक्षमः सहृदय उक्तलोकव्यवहाराणां प्रयोक्ता नेति विनिश्चितम्। तर्हि किमसहृदयस्योक्तिः काव्यत्वाकाव्यत्वनिर्धारणे प्रमाणम्? नैव। यथा महाकविकालिदासादिविरचितानां 'यास्यत्यद्य शकुन्तलेति'[5] इत्यादिपद्यानां काव्यत्वं तु सहृदयस्य चमत्कारानुभूत्या पूर्वसिद्धमेव। तच्छ्रुत्वा अर्थबोधासमर्थैः 'काव्यं श्रुतमर्थो न ज्ञात' इत्याद्युच्चारयद्भिः कैश्चिदल्पज्ञैः तस्य कविकर्मविशेषस्य काव्यम् इति व्यपदेशे सा पूर्वसिद्धिरेव कारणम्, न पुनः स्वानुभूतिः। अत उक्तलोकव्यवहारान् प्रमाणरूपेणोपस्थाप्य शब्दमात्रे काव्यत्वनिर्धारणं सर्वथानुचितमेव। यदि च काव्यं श्रुतम्' 'काव्यं पठितम्' प्रभृतिप्रयोगानाधृत्य काव्यपदस्य शब्दमात्रपरताऽङ्गीक्रियते, तर्हि 'काव्यं पाठितम्', 'काव्यं बुद्धम्' प्रभृतिप्रयोगबलेनार्थमात्रपरताऽपि काव्यपदस्याङ्गीकरणीयैव।

किञ्च, शब्दमात्रे काव्यत्वस्वीकारे पण्डितराजविनिर्दिष्टं 'शब्द' इत्यस्य 'रमणीयार्थप्रतिपादक' इति विशेषणमप्यनुपपन्नं स्याद् अर्थबोधाभावेऽपि काव्यत्वसिद्धेः। यत्र काव्यत्वस्वीकरणे अर्थबोधोऽप्यनपेक्षितस्तत्रार्थस्य रमणीयतायाः का चर्चा? वस्तुतः कस्यापि वाक्यस्य काव्यत्वे सहृदयसमाजस्यालौकिकी आनन्दानुभूतिरेव प्रमाणम्। सा चानुभूतिः उत्कृष्टवाच्यव्यङ्ग्याद्यर्थबोधाभावे शब्दमात्रेण कथमपि न सम्भवति।

पुनश्च रसगङ्गाधरकारैः यदुक्तम् 'अपि च काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोर्व्यासक्तं प्रत्येकपर्याप्तं वा? नाद्यः, 'एको न द्वौ' इति व्यवहारस्येव 'श्लोकवाक्यं न काव्यम्' इति व्यवहारस्यापत्तेः। न द्वितीयः, एकस्मिन् पद्ये काव्यद्वयव्यवहारापत्तेः[6] इति तदप्याग्रहमूलकमेव। अत एवाहुस्तन्मतखण्डनप्रवृत्ता आह्लादकत्वोपादनसामर्थ्यं शब्दार्थयोरुभयोरपि व्यासक्तमिति प्रतिपादयन्तो नागोजीभट्टाः रसगङ्गाधरस्यैव मर्मप्रकाशाख्यायां टीकायाम्–"आस्वादव्यञ्जकत्वस्योभयत्राप्यविशेषात्



चमत्कारिबोधजनकज्ञानविषयतावच्छेदकधर्मवत्त्वरूपस्यानुपहसनीयकाव्यलक्षणस्य प्रकाशाद्युक्तलक्ष्यतावच्छेदकस्योभयवृत्तित्वाच्च 'काव्यं पठितम्', 'श्रुतं काव्यम्', 'बुद्धं काव्यम्' इत्युभयविधव्यवहारदर्शनाच्च काव्यप्रवृत्तिनिमित्तं व्यासज्यवृत्ति। अत एव वेदत्वादेरुभयवृत्तित्वप्रतिपादकः 'तदधीते....' इत्यादिसूत्रस्थो भगवान् पतञ्जलिः सङ्गच्छते। लक्षणयाऽन्यतरस्मिन्नपि तत्त्वाद् 'एको न द्वौ' इतिवन्न तदापत्तिः। तेनानुपहसनीयकाव्यलक्षणं प्रकाशाद्युक्तं निर्बाधम्"[7] इति।

इदमप्यत्रावधेयं यद् द्वित्वसंख्याया आश्रयत्वेन वर्तमानयोः पदार्थयोर्नित्यसम्बन्धस्यापरिहार्यता नैव। यथा द्वित्वसंख्याश्रयीभूतयोर्घटपटयोर्न नित्यसम्बन्धः, अतस्तयोरन्यतरस्य सद्भावे 'एको न द्वौ' इतिवद् 'घटो न घटपटौ' इति व्यवहारः सम्भवति। यत्र तु नित्यसम्बद्धानां शब्दार्थादीनां द्वित्वसंख्याश्रयत्वं तत्र 'एको न द्वौ' इति व्यवहार एव कथं वा स्यात्? सम्बद्धयोर्द्वयोरप्ययुतसिद्धत्वात् एकस्य सद्भावेऽपरस्याप्यवश्यम्भावित्वाच्च। अतः काव्यत्वस्य व्यासज्यवृत्तितायाः स्वीकारे न काचिद् हानिः।

केचित् 'कविकर्म काव्यम्' इति समाख्यानुरोधात् कविकर्मतायाः शब्दे सत्त्वाद् अर्थस्य च तत्कृत्यसाध्यत्वात् प्रवृत्तिनिमित्तं शब्द एवेति मन्वानाः 'आस्वादजीवातुः पदसन्दर्भः काव्यलक्षणण्' इति वदन्ति तदयुक्तम्, आस्वादव्यञ्जकत्वस्यैव काव्यत्वप्रयोजकत्वात्तस्य च शब्दार्थयोरुभयत्राप्यविशेषात्। इदमत्रावधेयम्- यद्यप्यर्थो न कविकर्म सिद्धरूपत्वात्तथापि वक्तृबोद्धव्यादीनां वैशिष्ट्यात् स एव सिद्धरूपोऽप्यर्थश्चमत्कारविशिष्टः सन् कविप्रतिभयैव प्रकाशत इत्यस्ति तत्रापि कविकर्मत्वम्। अत एवाहुर्विवरणकारा महामहोपाध्यायगोकुलनाथोपाध्यायचरणाः 'यद्यप्यर्थो न कविकर्म, तथापि प्रथमप्रकाश्यमेवात्र कर्माभिधीयते। अन्यथा शब्दनित्यतावादे मौनिना लिखित्वा ज्ञापिते च शब्देऽपि कविकर्मत्वं न स्यात्। तथा च विनिगमनाविरहादर्थविशेषावरुद्धः वाच्यवाचकभावेन सम्बद्धः शब्द इव शब्दविशेषावरुद्धोऽर्थोऽपि लोकोत्तरचमत्कारव्यञ्जकतया काव्यमित्युभयोः प्राधान्येन निर्देशः। काव्यं शृणोतीति व्यवहारस्त्वर्थांशेऽपि शाब्दबोधार्थकशृणोतिनोपपादयितुं शक्यते' 'आत्मा श्रोतव्य' इतिवत्।"[8] महामहोपाध्यायगङ्गाधरशास्त्रिणस्तु "उद्देश्यता पुनः शब्दार्थयोरेव न तु शब्दमात्रे, शब्दमात्रे कविसरम्भगोचरत्वायोगेन लोकोत्तरवर्णनानिपुणकविकर्मताया उभयत्राप्यविशेषात्, कव्युच्चारणकर्मतायाः शब्दे कविसमवेतरसबोधौपयिकसामग्रीसत्त्वविषयकज्ञानकर्मतायाश्च अर्थे सत्त्वात्"[9] इत्याहुः। इत्थमर्थेऽपि कविकर्मतायां

सूपपादितायां सत्यां शब्दे कविकर्मताया व्यवहारस्तु भाक्त एव। वस्तुतस्तु 'क्षिप्तो हस्तावलग्नः' इत्यादौ हस्तमात्रस् वाचकपदस्यावय-वावयविभावसम्बन्धेन हस्तैकदेशे लक्षणया प्रयोगस्तथैव 'काव्यं श्रुतम्' 'काव्यं बुद्धम्' इत्यादिप्रयोगेष्वपि शब्दार्थोभय-वाचकस्यापि काव्यपदस्यैकदेशलक्षणया शब्दमात्रेऽर्थमात्रे वा प्रयोग इत्यवगन्तव्यम्।

न च आस्वादव्यञ्जकत्वमेव काव्यत्वप्रयोजकम् इत्युक्ते रागस्यापि काव्यत्व-प्रसक्ति स्तस्यापि रसव्यञ्जकतायाः सकलालङ्कारिकसम्मतत्वेनेति वाच्यम्। रागे व्यक्त-वर्णत्वस्यानपेक्षितत्वात् शब्दार्थशरीरे काव्ये च व्यक्तवर्णत्वस्यापरिहार्यत्वात्। यो हि रागगानावसरे स्वरसन्निविष्टशब्दार्थशरीरस्य काव्यस्य ग्रहणं कुत्रचिद् दृश्यते तत्र न तस्य स्वरूपाधायकत्वम्, अपितूत्कर्षाधायकत्वमेवेत्यवगन्तव्यम्।

इदमप्यत्र विचारणीयं यत् शब्दमात्रं काव्यपदस्य प्रवृत्तिनिमित्तं यदि स्यान्नार्थस्तर्हि येऽप्यर्थगुणार्थालङ्कारादयस्तेषां शरीरभूतशब्दद्वारेणैव रससम्बन्धो व्यवहितः स्यात्। तथा चार्थालङ्कारादीनां शब्दालङ्काराद्यपेक्षया हीनत्वं सिद्ध्येत्। परं नैतदभिमतं विदुषाम्। वस्तुतः काव्याङ्गनिरूपणं प्रतिज्ञायैवार्थालङ्कारादीनां लक्षणग्रन्थेषु प्रतिपादनाल्लक्ष्यतावच्छेदकस्योभयवृत्तित्वं न पुनः शब्दमात्रवृत्तित्वमिति स्थितम्। तदुक्तं महामहोपाध्यायगङ्गाधरशास्त्रिणा–"अतएवार्थगुणानामर्थालङ्काराणामर्थशक्ति-मूलकध्वनीनां च निरूपणमुपपद्यते। न च तेषामुत्तमाद्यन्यतमकाव्यपदार्थप्रवेशाभावेऽपि रसोपयोगितामात्रेण निबन्धनमुपपद्यत इति वाच्यम्, काव्याङ्गनिरूपणं प्रतिज्ञाय तेषां निरूपणस्यासङ्गत्यापत्तेर्दुस्समाधानत्वाद्"[10] इति।

न केवलं शास्त्रकाराणामपितु काव्यकाराणामपि वचनं 'शब्दार्थौ' इत्यस्य लक्ष्यतावच्छेदकत्वे प्रमाणम्। कविकुलगुरुणा कालिदासेन "वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये"[11] इत्यादिना शिशुपालवधकृता महाकविना माघेन "शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते"[12] इत्यादिना च शब्दार्थयोरुभयोरेव सत्कविकर्मत्वं प्रतिपादितम्। अतः अस्मन्मते तु काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोरेवेति स्वीकर्तुं युक्तम् इति शिवम्।।

❖



## सन्दर्भाः

1. काव्यादर्शे, 1.10
2. अग्निपुराणे, 338.6–7
3. रसगङ्गाधरे (मदनमोहनझाकृतटीकायुते) प्रथमे आनने, पृ.10
4. रसगङ्गाधरे प्रथमे आनने, पृ.15
5. अभिज्ञानशकुन्तले, 4.6
6. रसगङ्गाधरे प्रथम आनने, पृ.19
7. रसगङ्गाधरे (टीकांशः), पृ.20-21
8. काव्यप्रकाशविवरणे, पृष्ठसंख्या 22
9. रसगङ्गाधरे (टीकांशः), पृ.21
10. तत्रैव, पृ.21
11. रघुवंशे, 1.1
12. शिशुपालवधे, 2.88

❖

# किञ्चित् पारिभाषिकम्

**काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र–तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।**
**अ० = अष्टाध्यायी। वा० = वार्तिकम्**

सामीप्यम् — समीपमेव सामीप्यम्

का.वर्त्तमानसामीप्ये वर्त्तमानवद् वा 3.3.131

आशंसा — आशंसनम् आशंसा, अप्राप्तस्य प्रियार्थस्य प्राप्तुमिच्छा। तस्याश्च भविष्यत्कालो विषयः

का. आशंसायां भूतवच्च 3.3.132

क्रियाप्रबन्धः — क्रियाणां प्रबन्धः सातत्येन अनुष्ठानम्

सामीप्यम् — सामीप्यं कालानां तुल्यजातीयेन अव्यवधानम्

का. नानद्यतनवत् क्रियाप्रबन्धसामीप्ययोः 3.3.135

क्रियातिपत्तिः — कुतश्चिद् वैगुण्यादनभिनिर्वृत्तिः क्रियायाः क्रियातिपत्तिः

का. लिङ्निमित्ते लृङ् क्रियातिपत्तौ 3.3.139

गर्हा — गर्हा कुत्सा इत्यनर्थान्तरम्

का. गर्हायां लडपिजात्वोः 3.3.142

गर्हा निन्दा कुत्सा इत्यनर्थान्तरम्

का. गर्हायां च 3.3.149

अनवक्लृप्तिः — अनवक्लृप्तिः असंभावना

अमर्षः — अमर्षः अक्षमा

का. अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि 3.3.145

चित्रीकरणम् — चित्रीकरणम् आश्चर्यमद्भुतं विस्मयनीयम्

का. चित्रीकरणे च 3.3.150

शेषः — यच्च यत्राभ्यामन्यत्र चित्रीकरणं शेषः

का.शेषे लृड्यदौ 3.3.151



# अकथितञ्चेतिसूत्रार्थविमर्शः

**डॉ. मनोज कुमार मिश्रः**

इह सूत्रे अकथितमिति चेति पदद्वयम्। तत्र च पदं यथापेक्षमर्थं समुच्चिनोति, अपादानकर्मत्वयोर्विषयविभागं च व्यवस्थापयति। अकथितमिति पदञ्च कथननिवृत्तिपरमसङ्कीर्तितमनुक्तमविवक्षितमर्थमिहाभिधत्ते, नाप्रधानं रूढम् भाष्यकृद्व्याख्यानात्। व्याख्यानञ्चेह भाष्यकृतः केनाकथितम्? अपादानादिभिर्विशेषकथाभिः इति प्रश्न-प्रतिवचनरूपम्। इह हि कथं वाक्यप्रबन्धे इत्यस्मान्निष्पन्नं नञा मुक्तमकथितमिति क्रियापदं प्रयुक्तम्, अत एव केनेति प्रश्नः। रूढिषु हि व्युत्पत्त्यर्थमेव क्रियोपादीयते, न तु प्रवृत्तिनिमित्तत्वार्थम्। तथा च गच्छतीति गौरिति व्युत्पत्तावपि यथा गच्छतीत्युक्ते केनेति प्रश्ने रथेनेति प्रतिवचनं भवति तथा गौरित्युक्ते प्रश्नप्रतिवचने न भवतः। तस्मान्नाप्रधानवाचि रूढमिदम्। अन्यथा 'ब्राह्मणस्य पुत्रं पृच्छति' इत्यत्र पुत्रविशेषणत्वेनोपात्तस्याप्रधानस्य ब्राह्मणस्याप्यनेन कर्मत्वमतिप्रसज्येत। न च तस्याकारकत्वान्न कर्मत्वमिति वाच्यम्, एवमपि 'पाणिना कांस्यपात्र्यां दोग्धि' इति करणाधिकरणयोरप्रधानत्वेनातिप्रसङ्गात्। तयोस्तु 'दण्डेन हन्ति' इत्यादौ करणस्य, 'कपाले क्षीरमस्ति' इत्यादावधिकरणस्य चास्त्यवकाशः, दुहादिपरिगणनात्।

ततश्च केनाकथितमित्याकाङ्क्षायां भाष्ये 'अपादानादिविशेषकथाभिः' इति यत्समाहितं तदेव वैयाकरणैर्व्याख्यातम्–अपादानसंप्रदानाधिकरणकर्मकरणकर्तृहेतुसंज्ञा-विशेषैरविवक्षितं कारकं कर्मसज्ञं स्यादिति। एवञ्चानेन सूत्रेण यस्यार्थस्य कर्मसंज्ञा भवति, सोऽर्थोऽपादानादिविशेषो न भवति, प्रत्युत कारकसामान्यम्। कारकत्वं ह्यपादानादीनां व्यापकीभूतमधिकारलब्धञ्च। अत एवेह भाष्योक्तौ विशेषपदं सन्निवेशितम्। ततश्च 'ब्राह्मणस्य पुत्रं पृच्छति' इत्यादावस्य नातिप्रसङ्गः, ब्राह्मणस्याकारकत्वात्।

अत्रायं समुदेति प्रश्नः–अनेन सूत्रेण यस्यार्थस्य कर्मसंज्ञा विधीयते, शाब्दबोधे तस्यार्थस्य कर्मत्वेन सम्बन्धित्वेन कारकत्वेन वा केन रूपेण भानमिति? तदस्य समाधाने वैयाकरणानां किल यानि मतान्तराणि विलसन्ति, तानि यथामति क्रमेणेह

समुपाद्यन्ते–

**1. पाणिनिमतम्–**जानन्ति सुधियो यदष्टाध्यायीसूत्रमतिरिच्य पाणिनिमत-प्रकाशकमिह नास्ति किमपि वाङ्मयम्। सूत्राणां पुनस्तदेव तात्पर्यं यन्महाभाष्याब्धौ सोपपत्तिकं फणिभाषितम्, यथोत्तरं मुनीनां प्रामाण्यमिति प्रामाणिक वचनम्। इत्थञ्च यद्यपि भाष्यमतमेव पाणिनिमतम्, तथाप्यष्टाध्यायीसूत्रं तत्क्रमं चानुलक्ष्य स्वातन्त्र्येण स्वयं किञ्चिदिह विचारणीयम्, तदेव खलु पाणिनिमतमिति समभ्यूहनीयम्, तस्य सूत्रमूलकत्वात्।

अष्टाध्यायीप्रथमाध्यायचतुर्थपादे 'कारके (1.4.23) इत्यधिकृतम्। ततः कारकप्रकरणं कारकविशेषनिरूपणमुपक्रान्तम्। तत्रादावपादानं सम्प्रदानं करणमधिकरणं च कारकं यथासंख्यमुत्सर्गापवादसूत्रजालेन सूक्ष्मेक्षिकया सन्निरूप्य कर्मकारकमुपसूत्रितम्। तदिह कर्मकारके पूर्वसूत्रैर्विधीयमानकर्मसंज्ञकानामाधाराद्यर्थानां यथा शाब्दबोधे कर्मत्वेन भानं भवति, तथेहापि कर्मत्वप्रकारकबोधे कामपि बाधां नैवोत्पश्यामः, प्रत्युत तथाविधबोधाभावे कर्मसंज्ञाविधानमेव निष्फलायेत, वदतो व्याघातात्। यथा संस्कारद्वारा विहितनाम्ना बोधाभावे जातस्य नामकरणं निष्फलम्। किञ्च तत्रापादानादिविशेषस्य विवक्षाभावेऽपि कारकसामान्यं वर्तत एवं कारकाधिकारात्। तथा च तस्य कारकत्वसामान्येन बोधे नास्ति काचिदनुपपत्तिः, यथा 'न ब्राह्मणं हन्यात्' इत्यादौ ब्राह्मणत्वसामान्यं भासते। एवञ्च 'अकथितञ्च' इति सूत्रेण विधीयमानकर्मसंज्ञकस्य शाब्दबोधे कर्मत्वेन कारकत्वसामान्येन वा भानं भवतीति पाणिनिमतमित्यवधारणीयम्।

किञ्चेहाविवक्षापि अपादानं सम्प्रदानं करणमधिकरणमिति चतुर्भिरेव कारक-विशेषैर्वक्तव्या, तेषामेव चतुर्णां पूर्वप्रकारान्तत्वात्। अत एवाचार्यैरुदाहरणान्यपि तेषामेवाविवक्षाया दर्शितानि। तथा च कर्मकर्तृहेतुसंज्ञाविशेषैरविवक्षिततत्वाभिधानम-किञ्चित्करम्। एवञ्च 'गां दोग्धि पयः' इत्यत्र क्षरणरूपफलाश्रयपयःकर्मकग्राम्य-जनाश्रयगवीकारकं दोहनम्, अथवा पयःकर्मकं गोकर्मकं दोहनमिति बोधः पाणिनिमते खलु युज्यते।

**2. महाभाष्यमतम्–**सूत्रस्यास्योदाहरणानि परिगणयता भगवता पतञ्जलिनोप-श्लोकितम्–

**दुहियाचिरुधिप्रच्छिभिक्षिचित्रामुपयोगनिमित्तपूर्वविधौ।**
**ब्रुविशासिगुणेन च यत्सचते तदकीर्तिताचरितं कविना।।**

इह कारिकायां भाष्यकारेण स्पष्टं प्रतिपादितं यद् दुहादीनां षण्णां धातूनामुपयोगस्य प्रधानकर्मणो यन्निमितं तदकथितम्, तथा ब्रुविशास्योर्गुणेन साधनेन प्रधानकर्मणा यत्सचते



सम्बन्ध्यते तदप्यकथितमिति। अपूर्वविधावित्यनेन च पूर्वविधिविषये नास्य सूत्रस्य प्रवृत्तिरित्यप्यभिहितम्। एवञ्चानया भाष्योक्तया तथ्यत्रयं प्रकाशते–1. दुहादीनामेव धातूनां प्रयोगे 'अकथितञ्च' इति सूत्रं प्रवर्तते, 2. दुहादीनां कर्मणो यन्निमित्तं तदकथितम्, 3. ब्रुविशास्योर्यत्कर्मसंबन्धि तदप्यकथितमिति।

पुनश्चाग्रे इह सूत्रभाष्ये भाष्यकारेणान्येऽपि द्विकर्मकधातवः सन्ति परिगृहीताः। तद्यथा–

**नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च।**
**द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः।।**

तत्र गतिबुद्धीति सूत्रे ण्यन्तानां गत्यर्थानां प्रयोगे सूत्रमिदं न प्रवर्तते, किन्तु नीवहहृधातूनां योगे दुह्यादिवत्प्रवर्तत एवेति निश्चेयम्।

पूर्वकारिकायामिह स्पष्टमभिहितं यदकथितं कर्म निमित्तं सम्बन्धि वेति। ततश्च शाब्दबोधे तस्य निमित्तरूपेण संबन्धिरूपेण वा भानं जायत इति भाष्याकूतमवधेयम्। एवञ्च गोनिमित्तं पयःकर्मकं दोहनमिति शाब्दबोधः। 'पुत्रं धर्मं ब्रूते' इत्यत्र च पुत्रसंबन्धि धर्मकर्मकं वचनमिति बोधो विवेकेनावगन्तव्यः। तदित्थं भाष्यकारेण संक्षेपेणैवाकथितकर्म संकेतितम्, न तु तस्य शाब्दबोधे भानप्रकारो विस्तरेण पार्थक्येन वा क्वापि न्यरूपि, परमिह संकेतितमर्थं लक्ष्यकुक्षीकृत्य भाष्यमतं किञ्चित्समभ्यूहितम्, यत् खलु आचार्यान्तरैरपि पश्चात्समीरितम्।

**3. काशिकादिमतम्–**इह काशिकापदेन वृत्तिकारो वामनोऽभिप्रेतः आदिपदेन च न्यासकारः पदमञ्जरीकारः कैयटश्चेति त्रयः संग्राह्याः। तत्रादावेतेषां व्याख्यानमनुक्रमेण निभालनीयम्। काशिकायां तावत्–

अकथितञ्च यत्कारकं तत् कर्मसंज्ञकं भवति। केनाकथितम्? अपादानादि-विशेषकथाभिः। परिगणनं कर्तव्यम्–

दुहियाचि.........आचरितं कविना (म.भा.1,334) उपयुज्यते इत्युपयोगः पयःप्रभृति, तस्य निमित्तं गवादि। तस्योपयुज्यमानपयःप्रभृतिनिमित्तस्य गवादेः कर्मसंज्ञा विधीयते। पाणिना कांस्यपात्र्यां गां दोग्धि पयः। पाण्यादिकमप्युपयोगनिमित्तम्। तस्य कस्मान्न भवति? नैतदस्ति, विहिता हि तत्र करणादिसंज्ञा। तदर्थमाह– अपूर्वविधाविति। ब्रुविशासिगुणेन च यत्सचते। ब्रुविशास्योर्गुणः साधनं प्रधानं कर्मधर्मादिकं तेन सम्बद्ध्यते तदकीर्तितमाचरितं कविना तदकथितमुक्तं सूत्रकारेण इति।

इह हि काशिकाकारेण महाभाष्यकारिकामवलम्ब्य तत्क्रमेणैवाकथितं परिभाषितम्।

तदत्र तत्क्वचित्कर्मनिमित्तरूपं क्वचिच्च कर्मसम्बन्धीति यथाभाष्यं विज्ञेयम्। अतो बोधोऽपि तस्यार्थस्य निमित्तत्वप्रकारकः संबन्धप्रकारकश्च यथायोग्यं परिकल्पनीयः।

काशिकाव्याख्यातुर्न्यासकारस्य जिनेद्रबुद्धेर्मतमपि यथाकाशिकं पूर्वोक्तमवगन्तव्यम्। तद्यथा व्याख्यानमस्यावलोकनीयम्–

"अपादानादिभिर्विशेषकथाभिरिति। कारकसामान्यकथाया व्यवच्छेदार्थमेतत्। यदि हि केनाप्यकथितस्य कर्मसंज्ञा स्यात्तदा 'माणवकस्य पितरं पन्थानं पृच्छति' इत्यत्र अकारकस्यापि माणवकस्य कर्मसंज्ञा स्यात्। परिगणनमिति। अन्यधातुव्यवच्छेदार्थमेतत्। उपयुज्यत इत्युपयोग इति कर्मसाधनो घञन्तः। . . .गां दोग्धि पय इति। ननु चात्र विहितापादानसंज्ञा, अस्ति हि अत्रापायो गोर्दुहेः क्षरणार्थत्वात्, क्षरति गौः क्षीरम्, तद् गोर्दोग्धा क्षारयति, एवञ्च तत्क्षार्यमाणं ततोऽपक्रामतीति स्पष्ट एवापायः, ततो नेदमुदाहरणमुपपद्यते? नैतदेवम्। सत्यपि हि अपाये नात्र गोरवधित्वं विवक्षितम्, किं तर्हि? क्षीरं प्रति निमित्तभावमात्रम्। यद्येवं गोः कारकत्वं न स्यात् यथा 'वृक्षस्य पर्णं पतति' इत्यत्र वृक्षस्य न, क्षरणक्रियां प्रति निमित्तभावेनाविवक्षितत्वात्, नैतत्, अवधित्वं ह्यत्र गोर्न विवक्षितम्, क्षरणं प्रति निमित्तभावस्तु विवक्षित एव। वृक्षस्य पर्णं पततीत्यत्र तु पतनं प्रति वृक्षस्य निमित्तभावमात्रमपि न विवक्षितम्, न केवलमवधिभाव इत्यसमानम्" इति।

न्यासकारस्यैतावता विस्तरेण व्याख्यानेन निर्गलितं यद् 'गां दोग्धि पयः' इत्यादौ अकथितं गवादिकं निमित्तरूपं कारकम्, न तु तदपादानं सम्बन्धरूपं कारकसामान्यं वेति। ततश्च न्यासकारमतेऽप्यकथितस्य कर्मणो निमित्तत्वप्रकारकः संबन्धप्रकारकश्च यथायथं शाब्दबोधोऽनुभावनीयः।

पदमञ्जरीकारो हरदत्तोऽपि यथान्यासं निमित्तरूपं सम्बन्धरूपं चाकथितं मनुते। तदुक्तं तेन–

"तस्य निमित्तं गवादीति। अनेन 'गां दोग्धि पयः' इत्यादो पयःप्रभृतेरुपयुज्यमानत्वादीप्सिततमत्वम्, गवादेस्तु तदर्थत्वादपादानस्यानीप्सिततमत्वं च दर्शयति। तथायुक्तत्वाभावाच्च गवादेस्तथायुक्तमित्यनेनापि न सिध्यति। एतदेव दर्शयति तस्यैवमित्यादि। उपयुज्यमानस्य पयःप्रभृतेर्यन्निमित्तं गवादि तस्येत्यर्थः। पाण्यादिकमप्युपयोगनिमित्तमिति तेनापि विनोपयोगस्य पयसोऽसम्भवात्। तदर्थमाहेति। तस्य करणादेः कर्मसंज्ञानिवृत्त्यर्थमित्यर्थः"–

अनेन व्याख्यानेन हरदत्तोऽपि पूर्वमतमेवानुसरति। आचार्यः कैयटोऽपि काशिकादिव्याख्यानमेवानुहरति। तथा हि–"उपयुज्यत इत्युपयोगः पयः फलादि, तस्य



निमित्तं गवादि। अनेन 'गां दोग्धि पयः' इत्यत्र पयस उपयुज्यमानत्वादीप्सिततमत्वम्, गोस्तु पयोऽर्थत्वादपादानस्यानीप्सिततमत्वं दर्शयति। तथायुक्तत्वाभावाच्च गोस्तथायुक्तमित्यनेनापि कर्मसंज्ञा न सिध्यति। ब्रुविशास्योर्गुणः साधनं प्रधानकर्म धर्मादिकम्, तेन च यत्सचते संबद्ध्यत इत्यर्थः।"

कैयटस्य व्याख्यानेऽस्मिन् न्यासकारहरदत्तादिमतमेव प्रकाशितं भवति। किञ्च पूर्वाचार्यवाक्यान्यप्यविकलानि कैयटेन व्याख्यायामिहोपयोजितानि। एवञ्चैतन्मतेऽपि गोनिमित्तकं पयःकर्मकं दोहनमिति शाब्दबोधः।

**4. भट्टोजिदीक्षितमतम्–**वाणीविलासबुधवृन्दवृन्दारकवन्दनीया दीक्षितास्तु सूत्रास्यास्य सार्थक्याय संबन्धरूपमकथितकर्माङ्गीकुर्वन्ति। उपयोगनिमित्तं चैतन्मते उपयोगसम्बन्धीति विज्ञेयम्, संबन्धस्यायातत्वेन निमित्तनिमित्तिरूपत्वात्। किञ्च भाष्यकारिकायां 'यत्सचते' इत्युक्त्या कर्मसंबन्धिनोऽपि ग्रहणमिष्यत एव। ततश्चाकथितकर्मणः सम्बन्धरूपत्वमपि भाष्यमूलकमेव। तदुक्तं प्रोढमनोरमायां दीक्षितेन– "परिगणनमिति। तेन 'नटस्य शृणोति' इत्यादि नातिप्रसङ्ग इति भावः। गां दोग्धीति। गोसम्बन्धि पयःकर्मकं दोहनमर्थः। स्यादेतत्, 'कर्तुरीप्सिततमं कर्म' 'तथायुक्तं चानीप्सितम्' इति सूत्राभ्यां गतार्थमेतत्, तथाहि–त्यजनोपसर्जनं त्याजनं दुहेरर्थः। दापनमङ्गीकरणं च याचेः। विक्लेदनं निर्वर्तनं च पचेरित्यादि। एवञ्च धातूपात्तव्यापार-विषयीभूतं यत्त्यजनदानाङ्गीकारादि तदाश्रयत्वं गवादीनां स्पष्टमेव। अत एव ह्यणौ कर्तुर्णौ कर्मत्वस्य न्यायसिद्धतया गत्यादिसूत्रं नियमार्थमिति प्राचां सिद्धान्तः। अत एव चाकडारसूत्रे 'अपादानमुत्तराणि॰' गां दोग्धि पयः इत्यत्र परत्वात्कर्मसंज्ञेति भाष्यं संगच्छते। पञ्चकं प्रातिपदकार्थ इति पक्षे त्ववधित्वफलाश्रयत्वयोर्युगपद् विवक्षायां चेदम्। अवधिभूता या गौस्तन्निष्ठो यः पयःक्षरणानुकूलव्यापारस्तद्विषयिणी गोपनिष्ठा प्रेरणेत्यर्थः। तथा च 'अकथितञ्चे'ति सूत्रं व्यर्थमिति चेत्, अत्रोच्यते–कर्मणः शेषत्वेन विवक्षायां 'न माषाणामश्नीयात्' इतिवत्षष्ठी प्राप्ता, तां बाधितुमिदं सूत्रम्। तथाचेह षष्ठीवत्संबन्धमात्रं द्वितीयार्थं इति स्थितम्। अपादानत्वमात्रविवक्षायान्तु पञ्चम्येव। गोः क्षीरविशेषणत्वे तु षष्ठी। तेन 'गोः पयो दोग्धि' इत्यपि प्रयोगः साधुरेव। एवमग्रेऽप्यूह्यम्।

अस्यां दीक्षितव्याख्यायामादौ सूत्रस्य वैयर्थ्यम्, ततोऽपादानत्वाद्यविवक्षायां प्राप्तषष्ठीबाधनार्थमस्य सार्थकत्वम्, संबन्धस्य द्वितीयार्थत्वेनेह शाब्दबोधे तस्यैव भानमिति च चत्वारोऽप्यंशा यथायथमुपपादिता ।

सिद्धान्तकौमुदीप्राचीनव्याख्यायां ज्ञानेन्द्रसरस्वतीविरचिततत्त्वबोधिन्यामपि दीक्षितमतस्यैव समर्थनं सोपपत्तिकं भाष्यानुकूलञ्च प्रदर्शितम्। तथाहि–

"गां दोग्धीति। पयःकर्मकं गोसंबन्धि दोहनमर्थः। पयोऽत्र मुख्यं कर्म, कर्तुरीप्सिततमत्वात्। गौस्तु पयसो निमित्ततामात्रेणोपात्ता, न तु वस्तुसत्ताऽप्यवधिभावेनेत्यपादानसंज्ञाया अप्रवृत्तेरनेन कर्मसंज्ञिका भवति। तदुक्तं हरदत्तेन-यद्यपि गोरवधिभावो विद्यते तथाप्यविवक्षिते तस्मिन्निमित्तमात्रविवक्षायमुदाहरणोपपत्तिः।"

अनेन व्याख्यानेनाकथितं निमित्तरूपमेवाङ्गीकृतम्। बोधस्तु संबन्धप्रकारक इति विवेकोऽवधारणीयः।

यद्यपि दीक्षितमतमिदं प्रत्याख्याय परवर्तिवैयाकरणैरिह कर्मत्वबोधः स्थापितस्तथाप्याधुनिकवैयाकरणेषु पण्डितसभापतिशर्मोपाध्यायप्रभृतयः पुनरेतन्मतं समर्थयन्ति। यथाहि रत्नप्रभाटिप्पण्याम्–

"यत्तु शब्दरत्नाकाराः 'शेषत्वेन विवक्षायां प्राप्तां षष्ठीं बाधितुमकथितञ्चेति सूत्रम्, तथाचेह षष्ठीवत्संबन्धमात्रं द्वितीयार्थः' इति मनोरमाखण्डनाय 'किञ्च कर्तुरित्यपि षष्ठ्यपवाद एव, तदभावे तद्विषयेऽपि षष्ठ्या एव प्राप्तेः। अतः षष्ठ्यपवादत्वमात्रेण न संबन्धत्वेन बोधकतोचिता' इत्याहुस्तन्न युक्तम्, कर्तुरिति सूत्राभावे शेषषष्ठ्याः प्राप्तिसम्भवेऽपि तत्सत्त्वे कर्मत्वादिविवक्षायामेव कर्तुरित्यस्य प्राप्त्या तदानीं शेषत्वाभावेन षष्ठ्यप्राप्तौ 'कर्मणि द्वितीया' इत्यस्य तदपवादत्वासम्भवेन तद्विहितद्वितीयायाः संबन्धार्थक- त्वाभावेऽपि 'अकथितञ्च' इत्यस्यापादनत्वाद्यविवक्षायां प्रवृत्त्या तदानीं 'षष्ठी शेषे' इत्यस्यापि प्राप्त्या 'येन नाप्राप्ते' इति न्यायेनापवादतया तद्विहितद्वितीयायाः संबन्धार्थकत्वे बाधकाभावादित्याहुस्तत्त्वविदः।"

यद्यपीह शब्दरत्नकारस्यैकां युक्तिं सत्तर्केण निरसितुं प्रयतितम्, तथापि सम्बन्धबोध- विरोधिनां वैयाकरणानामद्यापि नैका युक्तयस्तथैवासमाहितास्तिष्ठन्ति, अत आधुनिक- वैयाकरणानामाक्षेपैकदेशनिराशो धूलिप्रक्षेपमात्रम्। प्रत्युत नित्यानन्दपर्वतीयस्य लघु-शब्देन्दुशेखरटिप्पण्यां खल्वयं विचारः किञ्चिद् गाम्भीर्येण प्रदर्शितः, यत्र वै कर्मत्ववादिनामाक्षेपजातं निरसितुं प्रयतितम्। तथाहि–

"केचित्तु प्राचीनोक्तं समर्थयन्ति। तथाहि–यदुक्तं यदीदं न स्यात्तदा षष्ठी प्रवर्तेतेति संभावनामोणापवादतामाश्रित्य संबन्धार्थकत्वे सर्वत्र तथापत्तिरिति तन्न, तत्तत्सूत्रसत्त्वे कर्मत्वादिना विवक्षायां शेषत्वाभावेन षष्ठ्यप्राप्त्या तत्र संबन्धार्थकत्वासम्भवेऽपि प्रकृतसूत्रे सत्यपि षष्ठीप्राप्त्यापवादत्वस्य स्पष्टतया संबन्धार्थकत्वसम्भवात्। यदप्युक्तं संज्ञाशास्त्रेण विधेरपवाद इति तदप्युक्तम्, कर्मप्रवचनीयसंज्ञावदर्थबोधकोत्तरं द्वितीयाविधानाय कल्प्यमानद्वितीयाविधेः षष्ठीबाधकत्वमित्यस्य स्वेनैव वक्ष्यमाणतया वद्रीत्यात्रापि वक्तुं शक्यत्वात्। वैरूप्यन्त्वस्मिन्मते सह्यमेव, उद्देश्यतावच्छेदकफलाश्रयत्वादि-व्यतिरिक्त-



कर्मत्वादिशक्तीनां प्रमाणतोऽसिद्धानां तैरनङ्गीकारात्। फलाश्रयत्वात्कर्मत्व-मित्यादेस्तु तत्त्वात्कर्मसंज्ञेत्येवार्थः। कर्मत्वाविवक्षायामप्यनेन कर्मत्वमित्यस्य तु फलाश्रयत्वस्य स्वरूपतः फलाश्रयतात्वेन वा विवक्षायामपि सम्बन्धत्वेन तद्विवक्षायामप्यनेन कर्मसंज्ञेत्यर्थ इति न वदतो व्याघातः।"

इह टिप्पण्यां कर्मत्वबोधसाधिकाश्चतस्रो युक्तयो ध्वंसितास्तथाप्यासां युक्तीनां खण्डने समीचीनमौचित्यं न प्रतिभाति, 'वैरूप्यन्तु सह्यमेवे' त्यादिप्रौढिवादाश्रयणात्। अत एवेह कर्मत्वबोधवादः प्रबलः सत्तर्कसमन्वितः सन्स्वप्रतिपक्षमतिशेते।

**5. रत्नाकरकाररामकृष्णभट्टमतम्**–रामकृष्णभट्टेन वैयाकरणसिद्धान्त-कौमुदीरत्नाकरव्याख्यायामादौ दीक्षितमतं व्याख्याय ततस्तद्विरोधे मतद्वयं प्रादर्शि। तत्र 'अन्ये तु' इति प्रतीकेन मतमेकमुपक्रान्तम्, यत्र खलु 'अकथितञ्च' इति सूत्रं नियमार्थमूरीकृतम्, एतद्विहितद्वितीयायाश्च कर्मत्वबोधकत्वम्। तद्यथा–

"अन्ये तु अपादानमुत्तराणि गां दोग्धीति भाष्यानुरोधेन प्रकृतसूत्रं नियमार्थमेव। तथाहि–अकथितस्येप्सिततमनिमित्तस्य कारकस्य कर्मसंज्ञा यदि स्यात्तर्हि दुहादिसंबन्धिन एवेति नान्तर्भावितण्यर्थतायाम्, "मैत्रश्चैत्रं घटं करोति" इति न प्रयोगः। विध्यर्थत्वे त्विदं दुर्वारम्। क्रियान्वयित्वेऽपि संबन्धत्वेन विवक्षायान्तु गोः पयो दोग्धीति षष्ठ्येव, कर्मत्वविवक्षायान्तु द्वितीयैवेत्याहुस्तन्न, पयसोऽविवक्षायां गोरेवावधित्वेप्सितत-मत्वविवक्षायां तद्भाष्यमितीहत्यकैयटविरोधात्।"

एवञ्चेह पूर्वपक्षेऽन्येषां केषाञ्चिदाचार्याणां मतं दर्शयित्वा कैयट-विरोधात्तत्खण्डयित्वा च रामकृष्णः स्वमतेन सूत्रस्यास्य सार्थकत्वं विस्तरेण साधूपपादितवान्। उपपादनेऽस्मिन्नादौ भाष्यकैयटयोर्दिशा विषयविभागपूर्वकं सूत्रस्य सार्थकत्वम्, दुहादिपरिगणनप्रयोजनम्, तद्व्यावर्त्यम्, भाष्यप्रामाण्येनास्या अपि द्वितीयायाः कर्मत्वबोधकत्वमित्येते विषया अञ्जसा द्रष्टव्याः। तद्यथा–

"भाष्यकैयटयोस्तु उपयोगनिमित्तं गवादिकमीप्सितमेव, न तु ईप्सिततमम्, नापि द्वेष्यमुदासीनं वा। अतोऽप्राप्तकर्मसंज्ञाऽनेन विधीयत इति स्थितम्। तथाहि–

**एतेन कर्मसंज्ञा सर्वा सिद्धा भवत्यकथितेन।**
**तत्रेप्सितस्य किं स्यात्प्रयोजनं कर्मसंज्ञायाः।।**

'अकथितं कर्म' इत्येतावता सूत्रेण 'तण्डुलान्पचति, विषं भुङ्क्ष्व, गां दोग्धि पयः' इत्यादौ सर्वत्र कर्मसंज्ञासिद्धेः 'कर्तुरीप्सिततमं' 'तथायुक्तम्' इति सूत्रद्वयं व्यर्थमित्यस्य श्लोकस्यार्थः। तत्रेत्याहोत्तरेण श्लोकेन–

**यत्तु कथितं पुरस्तादीप्सितयुक्तं च तस्य सिध्यर्थम्।**

**ईप्सितमेव तु यत्स्यात्तस्य भविष्यत्यकथितेन।।** इति।

'यवेभ्यो गां वारयति' इत्यत्रेप्सितेन यवादिना युक्तं यद्‌गवादिकं तस्य कर्मसंज्ञार्थं 'कर्तुरीप्सिततमम्' इत्यारब्धव्यम्। 'वारणार्थानाम्' इत्यस्य कर्मसंज्ञायाश्च विषयविभागार्थं च। अन्यथा 'गोः' कथितत्वेनाकथितं कर्मेत्यस्याप्राप्तावपादानसंज्ञा स्यान्न कर्मसंज्ञा। तस्मिन्नारब्धे द्वेष्योदासीनयोः कर्मता न सिद्धयतीति 'तथायुक्तम्' इत्यारम्भणीयम्। न च तयोः 'अकथितम्' इत्यनेनैव सिद्धे किं तेनेति वाच्यम् ईप्सितत्वाभावात्, दुहादिपरिगणनात्, इतरथा 'नटस्य श्रृणोति' इत्यादावतिप्रसंगात्। अत एवान्तर्भावितण्यर्थतायां 'मैत्रयश्चैत्रं घटं करोति'इति। नापादनीयम्। 'ईप्सितमेव' इत्येवशब्दस्तु ईप्साप्रकर्षाभावसूचनाय। ईप्सितस्य कर्मतासिद्धये 'अकथितं च' इति सूत्रमिति यावत्।

इह व्याख्या सूत्रस्यास्य विध्यर्थत्वमुररीकृतम्। 'वारणार्थानाम्' 'अकथितञ्च' इत्यनयोरीप्सितत्वरूपविषयैक्येऽपि यत्र दुहादीनामीप्सितत्वं तत्र 'अकथितं च' इति कर्मत्वस्य प्रवृत्तिः, अन्यत्र त्वादानत्वस्येत्यनयोर्विषयविवेको निभालनीयः। बोधस्त्विह कर्मत्वप्रकारक एवोपपादितः, कारकव्याप्यत्वादिति बोध्यम्।

**6. नागेशमतम्**—सूत्रस्यास्य शब्दरत्ने लघुशब्देन्दुशेखरे चादौ दीक्षितमतेन सम्बन्धबोधकत्वमुपपादितम्, तदनु तन्मतमपाकृत्य पूर्ववर्तिनो रामकृष्णस्य कर्मबोधकत्वरूपं मतमिह नागेशेन विस्तरेण युक्तयुक्त्या च पूर्णं प्रतिष्ठापितम्। तदिह मुख्यतश्चतस्रो युक्तयो निरूपिताः। तत्राद्या, कर्मत्वशक्तिरूपं कर्मत्वमेकविधमेव अतस्तस्य शाब्दबोधेऽपि भानं जायत एव तत्रोपस्थितत्वात्। अपादानत्वाद्यविवक्षायां सत्यामपि तत्र सम्बन्धविवक्षाया अभावात्सम्बन्धबोधकताया अनौचित्यमिति द्वितीया युक्तिः। सम्भावनामात्रेण षष्ठ्यपवादत्वमाश्रित्य सम्बन्धत्वेन कर्मादिबोधकताकल्पने सर्वत्र षष्ठी स्याद् वदतो व्याघातश्चेति तृतीयः सत्तर्कः। 'कर्मणि द्वितीया' इत्येकेनैव सूत्रेण सर्वत्र द्वितीयाविधानात्तस्याः क्वचित्कर्मत्वबोधकत्वं कुत्रचिच्च सम्बन्धादिबोधकत्वमिति वैरूप्यमनुचितमिति चतुर्थी युक्तिः। किञ्च सूत्रभाष्यप्रमाणमप्यस्य सम्बन्धार्थकत्वेन नोपलभ्यते अतोऽनेन सूत्रेण यस्यार्थस्य कर्मसंज्ञा विधीयते शाब्दबोधे तस्यार्थस्य कर्मत्वेनैव भानं भवतीत्यवधारणीयम्। शब्दरत्नेऽयमेव विचार इत्थं निरूपितः—

"किञ्च कर्तुरित्यपि षष्ठ्यपवाद एव तदभावे तद्विषयेऽपि षष्ठया एव प्राप्तेः अतः षष्ठ्यपवादत्वमात्रेण न सम्बन्धत्वेन बोधकतोचिता। तस्मादत्रापि क्रियाजनकतासमानाधिकरणकर्मत्वशक्तिमत्त्वेनैव बोध इत्येवोचितम्।"



लघुशब्देन्दुशेखर तावत्—

"केन रूपेण विवक्षेति चेत्कर्मत्वेनेति गृहाण। कारकत्वव्याप्यसंज्ञानां स्वबोध्यार्थे कर्मत्वादिशक्तित्त्वबोधकत्वाद् बोधोऽपि तथैव। तत्तच्छास्त्राभावे सर्वत्र षष्ठीप्राप्त्या सर्वासां तदपवादत्वेन तदपवादत्वमात्रेण सम्बन्धार्थकत्वं न युक्तम्। अत एव कर्मणि द्वितीया इत्यस्य न वैरूप्यम्। अत एवैतत्सूत्रशेषे भाष्येऽनेनैव सिद्धे आद्यसूत्रद्वयवैयर्थ्यमाशङ्क्येप्सितमात्रस्याप्यनेन संज्ञायां 'वारणार्थानाम्' इति सूत्रस्यावकाशत्वे माणवकादपि पञ्चमी स्यादिति ईप्सिततममित्याद्यारब्धव्यमित्युत्तरितम्। एतेन दुहादीनां व्यापारद्वयार्थकत्वे कर्तुरिति कर्मत्वे तत्त्वेनाविवक्षायामप्यनेन कर्मत्वमिति परास्तम् वदतो व्याघातात्। अत एव कर्तुरित्यनेन सिद्धिमाश्रित्यास्य वैयर्थ्यं भाष्ये नाशङ्कितम्।"

प्रसङ्गेऽस्मिन्नागेशमतं समर्थयतो वासुदेवदीक्षितस्य बालमनोरमाव्याख्या विलोकनीया, तत्र नूनं पदार्थजातं सारल्येन प्रकाशितम्। यथा "वस्तुतस्तु अपादानत्वादिविशेषरूपेणाविवक्षितम्, किन्तु कर्मत्वेनैव विवक्षितमकथितम्। तादृशमपादानादि कर्मसंज्ञकं स्यादित्यर्थः। कारकत्वस्याप्यसंज्ञानां स्वबोध्ये कर्मत्वादिशक्तिमत्त्वबोधकत्वाद् बोधोऽपि तथैव। एवञ्च 'गां दोग्धि पयः' इत्यत्र गोकर्मकं पयःकर्मकं च दोहनमित्येव बोधः।"

एवञ्चेह नागेशमतमेवाञ्जसा संक्षेपेण च प्रकटितम्। तदित्थमकथितपदार्थविचारप्रसङ्गेऽस्मिन्निह चतुर्दशानां वैयाकरणानां व्याख्यानानि समालोडितानीति द्रष्टव्यम्। पदार्थस्वरूपावधारणात्परं प्रयोजनं तस्य पार्थक्येन प्रदर्शनीयम्, येन पाठकानां बलवती प्रवृत्तिराशु समुदियात्। अतः पूर्वमनुस्यूतमपि प्रयोजनमनुबन्धाय पृथक्कृत्य प्रस्तूयते।

**सूत्रप्रयोजनम्**—महाभाष्ये सूत्रस्यास्य वैयर्थ्यं क्वापि न दर्शितम्, प्रत्युतानेन सूत्रेण 'कर्तुरीप्सिततमम्' 'तथायुक्तम्' इत्यनयोः सूत्रयोर्वैयर्थ्यमाशङ्किकतमित्युक्तम्। यथा—

**एतेन कर्मसंज्ञा सर्वा सिद्धा भवत्यकथितेन।**

**तत्रेप्सितस्य किं स्यात्प्रयोजनं कर्मसंज्ञायाः।।** इति।

इयं शङ्का तत्र श्लोकेनैवं समाहिता यथा—

**यत्तु कथितं पुरस्तादीप्सितयुक्तं च तस्य सिद्ध्यर्थम्।**

**ईप्सितमेव तु यत्स्यात्तस्य भविष्यत्यकथितेन।।** इति।

समाधानेऽस्मिन् 'यवेभ्यो गां वारयति' इत्यादौ ईप्सितयुक्तस्य गवादेः कर्मसंज्ञा-विधानाय 'कर्तुरीप्सिततमम्' इति, 'विषं भुङ्क्ष्व' इत्यादौ अनीप्सितस्य विषादेः कर्मसंज्ञार्थं 'तथायुक्तम्' इति, ईप्सितस्य कर्मतासिद्धये चेदं सूत्रमावश्यकम्। तत्र 'वारणार्थानामीप्सितः' इत्यपादानसंज्ञाचारितार्थ्याय तदपवादविषयं परित्यज्य सूत्रमिदं प्रवर्तते। तथा सति 'नटस्य शृणोति' इत्यादौ नटस्य कारकत्वेनातिप्रसङ्गः स्यात् अतो भाष्ये दुहादीनां धातूनां परिगणनं कृतम्। ततश्च दुहादिष्वीप्सितस्य कर्मसंज्ञाविधानं सूत्रस्यास्य प्रयोजनम्।

काशिकायां तद्व्याख्याने न्यासे चास्य नैष्फल्यं क्वापि नोक्तम्, प्रत्युत दुहादीनामकथितस्य कर्मसंज्ञाविधानार्थं सूत्रस्यावश्यकत्वमङ्गीकृतम्।

न्यासव्याख्यायां पदमञ्जर्यां हरदत्तेनापि यथान्यासं सूत्रस्य सार्थकत्वं परिगणनस्य व्यावर्त्यत्वञ्च निरूपितम्। तत्र किल दुहादीनां प्रयोगे प्रयोजकव्यापारेणाप्यमानत्वरूपा कल्पना काचिदभिनवोद्भाविता, यस्या यथावदुल्लेखः कैयटेनापि कृतः। यद्यप्यनया कल्पनयेह सूत्रवैयर्थ्यं मनागपि नापादितम्, तथापि दीक्षितनागेशप्रभृतिभिर्वैयाकरणैरनया सूत्रस्य वैयर्थ्यं साधितम् इत्यवधेयम्। तद्यथा पदमञ्जर्याम्–

"ननु चात्रायमर्थः - गौः पयस्तजति, दोग्धा गवा पयस्त्याजयतीति तत्र प्रयोजकव्यापारेणाप्यमानत्वात्सिद्धा गोः कर्मसंज्ञा। न च वाच्यम् प्रयोजकव्यापारेणाप्य-मानस्य यदि भवति गत्यर्थादिष्वेवेत्युत्तरसूत्रे नियमादत्र न प्राप्नोति, यथा 'पचन्तं देवदत्तं प्रयुङ्क्ते, पाचयति देवदत्तेन' इति, ण्यन्तेष्वेव स नियमः, अयन्तु प्रकृत्यन्तः, नैतदस्ति, यथा ण्यन्तेषु धातुषु क्रियाविशिष्टस्य प्रयुक्तिः प्रतीयते गमयतीति, नैवमत्र, निष्क्रियस्यापि गवादेर्दोहननादिषु विनियोगात्। तथाहि–अदुहानाऽपि गौर्दुह्यते, अगच्छन्तो भारादयो नीयन्ते। तस्माद् 'दोग्धि' इत्येकस्या एव क्रियायाः श्रवणाद् गोपयसोर्भेदेन कर्मत्वं न भवति। णिचि तु सति प्रकृत्यंशस्य प्रत्ययांशस्य च भेदेन द्वे क्रिये वाच्ये इति कर्मभेदोपपत्तिः।"

हरदत्तस्य सोऽयम्भावः कैयटेन संक्षेपेण सारल्येन चैवं प्रारूपि, यथा-"ननु 'गां दोग्धि पयः' इत्यस्यायमर्थः – गौः पयस्त्यजति, देवदत्तो गवा पयस्त्याजयति। तत्र प्रयोजकव्यापारेणाप्यमानत्वाद् गोः कर्मत्वं सिद्धम्। नैतदस्ति, यथा ण्यन्तेषु धातुषु क्रियावष्टिः प्रयुज्यत इति प्रतीतिः, नैवमिह, निष्क्रियस्यापि गवादेर्दोहनादिषु विनियोगात्।" एवञ्चानया कल्पनया सूत्रस्यास्य वैयर्थ्यं नोपपादितम्, प्रत्युत विभाग-जन्यसंयोगानुकूलव्यापारमात्रस्य धात्वर्थत्वे गोरवधित्वात्तदविवक्षायामिदमावश्यकमिति भावः।



प्रौढमनोरमायां दीक्षितेन हरदत्तप्रादुर्भावितामिमां कल्पनामाश्रित्य 'अकथितञ्च' इति सूत्रस्य वैयर्थ्यमित्थमापादितम्–"तथाहि त्यजनोपसर्जनं त्याजनं दुहेरर्थः। दापनमङ्गीकरणं च याचेः। विक्लेदनं निर्वर्तनं च पचेरित्यादि एवञ्च धातूपात्त-व्यापारविषयीभूतं यत्त्यजनदानाङ्गीकारादि तदाश्रयत्वं गवादीनां स्पष्टमेव।.... तथाच 'अकथितञ्च' इति सूत्रं व्यर्थमिति चेत् अत्रोच्यते–कर्मणः शेषत्वेन विवक्षायां 'न माषाणामश्नीयात्' इतिवत् षष्ठी प्राप्ता, तां बाधितुमिदं सूत्रम्।" एवञ्च दीक्षितमतेन सूत्रमिदं व्यर्थीभूय सदपादानत्वाद्यविवक्षायां 'गां दोग्धि पयः' इत्यादौ प्रसक्तां षष्ठीं बाधते। परिगणनफलं चेह पूर्ववत् 'नटस्य शृणोति' इत्यादावस्यातिप्रसङ्गवारणं विज्ञेयम्।

तत्त्वबोधिन्यां तावत् सूत्रस्य प्रयोजनमित्थमुक्तम्–"गां दोग्धीति। पयःकर्मकं गोसंबन्धि दोहनमर्थः। पयोऽत्र मुख्यं कर्म, कर्तुरीप्सिततमत्वात्। गौस्तु पयसो निमित्ततामात्रेणोपात्ता, नं तु वस्तुसताऽप्यवधिभावेनेत्यपादानसंज्ञाया अप्रवृत्तेरनेन कर्मसंज्ञिका भवति।"

नागेशस्तु प्रदीपोद्द्योते शब्देन्दुशेखरेऽन्यत्रापि अनुवेलमपीपदद् यद् दुहादयोऽण्यन्ताः सन्तोऽपि केचन व्यापारद्वयार्थका धातवः सन्ति। तेषां व्यापारद्वयविवक्षायां सूत्रमिदं सर्वथा व्यर्थम्। यथा–अन्तःस्थितद्रव्यनिष्ठविभागानुकूलव्यापारानुकूलव्यापारो दुहेरर्थः। तत्र द्रव्यनिष्ठविभागाश्रयस्य पयसः तदनुकूलव्यापाराश्रयस्य गोश्च कर्तुरित्येव कर्मत्वं सिद्धम्। यदा च तेषां व्यापारद्वयं न विवक्षितम्, पयोनिष्ठविभागानुकूलव्यापारादिरेव धात्वर्थस्तदाऽपादानत्वाद्यविवक्षयामन्येनासिद्ध-कर्मत्वार्थमिदमावश्यकम्। एवञ्च नागेशदिशा सूत्रमिदं विवक्षाधीनं वाच्यम्। इह नागेशमतमनुसरन् वासुदेवदीक्षितोऽपि उक्तवान्–"एवञ्च कर्तृव्यापारप्रयोज्यक्षरणात्मकविभागविशेषाश्रयत्वाद् गोः पयसश्च पूर्वसूत्राभ्यां कर्मत्वमस्त्येव"–इति। वस्तुतः स्थितस्य गतिश्चिन्तनीयेति न्यायेनेह सूत्रमस्तीति प्रयोजनं तस्य वक्तव्यमितिकृत्वा नागेशमतेऽस्य प्रयोजनमुक्तम्। वस्तुतस्तु तत्रेदं व्यर्थमेव।

सिद्धान्तरत्नाकरे स्वमतेनान्येषाञ्च मतेन सूत्रस्य द्विधा प्रयोजनं प्रतिपादितम्। तत्राप्येषां मतेन सूत्रमिदं नियमार्थम्। नियमाकारश्चेह–अकथितस्येप्सिततमनिमित्तस्य कारकस्य कर्मसंज्ञा यदि स्यात्तर्हि दुहादिसम्बन्धिन एव इति। व्यावर्त्य चास्य नियमस्यान्तर्भावितण्यर्थतायामपि दुहादिभिन्ने सूत्रमिदं न प्रवर्तते। तेन 'मैत्रश्चैत्रं घटं करोति' इति न प्रयोगः।

रत्नाकरकारः स्वमतेन तु सूत्रमिदं विध्यर्थं मनुते, 'गां दोग्धि पयः'

इत्यादावुपयोगनिमित्तस्य गवादेर्राप्सिततमद्वेष्योदासीनान्यमतमत्वाभावेनाप्राप्तकर्म-संज्ञाविधानात्। एवञ्च दुहादीनामपादानत्वाद्यविवक्षायां कर्मत्वार्थं सूत्रमिदं सफलम्। परिगणितभिन्नधातुसम्बन्धीप्सितस्य कर्मसंज्ञाविधानविरहादन्तर्भावितण्यर्थतायां 'चैत्रेण घटं करोति' इत्यादौ तृतीयैव। एवञ्च दुहादिभिन्नान्तर्भावितण्यर्था धातवोऽस्य व्यावर्त्या इत्यवधेयम्।

इह शाब्दबोधमुखेन 'अकथितञ्च' इति सूत्रस्यार्थः स्वरूपं प्रयोजनं च वैयाकरणानां मतेन यथामति किञ्चित्प्रदर्शितम्। तत्र वैयाकरणानां प्रायो विचारसाम्येऽपि केचन नवा अर्थास्तत्र तत्र व्याख्यानेषु तेषां भासन्ते, येषां तत्तच्छब्दैरेव भूयसा साक्षात्कारस्समायोजितः। तत्र मुख्यतः कर्मनिमित्तत्वं कर्मसम्बन्धित्वं कर्मत्वञ्चेति त्रीणि स्वरूपाणि अकथितकर्मण इह दर्शितानि, अन्येषाञ्च तत्रैव त्रिष्वन्तर्हिततत्वात्। सूत्रस्य प्रयोजनं तावत्स्पष्टप्रतिपत्त्यर्थमनुस्यूतमपीह पृथगुपवर्णितम्, प्रवृत्तिप्रयोजकत्वात्। इह संज्ञाया अर्थनिबन्धत्वं द्विकर्मकदुहादिधातुत्वं तेभ्यः कर्मणि प्रत्ययविधानञ्चेत्येते त्रयोऽप्यंशाः सन्त्यनेने संबद्धाः परमिह ते मनागप्यस्पृष्टा इति द्रष्टव्यमित्यलं पल्लवितेन।

❖



# शिवराजविजये विरोधाभासालङ्कारः

डॉ. रंजना मिश्रः

'अलंक्रियतेऽनतेति अलङ्कारः' इत्यस्याः व्युत्पत्तेः अनुसारेण अलङ्काराः काव्यस्य शोभाधायकानि तत्त्वानि सन्ति। कवेरुद्देश्यं वस्तूनामितिहाससदृशं वर्णनं न भवति, अपितु वस्तूनां दर्शनेन उत्पन्नायाः स्वानुभूतेः प्रकटनं भवति। अस्याः अनुभूतेः प्रकटनार्थं कविः लौकिकमलौकिकं, सूक्ष्मं-स्थूलं, सजीवं-निर्जीवं मूर्तं-अमूर्तं च कमपि विषयं माध्यमं करोति। अनेन प्रकारेण कविः विविधान् तदर्थं तस्य वाणी सामान्या न भूत्वा विशिष्टा उक्तिः भवति। इयं विशिष्टोक्तिः विरोधादीन-लङ्कारनुत्पादयति। उक्तिवैचित्र्येणैतेन अलङ्कारेष्वेतेषु चमत्कारस्याधानं भवति।

## विरोधालङ्कारः

**आचार्यरुय्यकस्यानुसारेण**–"विरुद्धाभासत्वं विरोधः।"[1] यत्र वास्तविको विरोधः न भवत्यपितु विरोधस्य आभासमात्रं भवति तत्र विरोधाभासोऽलङ्कारो भवति। अस्मिन् आपाततः विरोधस्य प्रतीतिः भवति, न तु वास्तविको विरोधो भवति। अयं श्लेषेऽपि आश्रितः किन्तु सर्वथा श्लेषः आवश्यको न भवति। प्रकृतवाक्यार्थे विरोधस्य प्रतीतेः कारणेनैव विरोधाभासालङ्कारो भवति। व्यङ्ग्यार्थेषु विरोधे सति विरोधालङ्कारः ध्वनिः भवति।

अस्य वाचकं चिह्नम् 'अपि' अस्ति किन्तु विरोधालङ्कारे तस्य स्थितिः अनिवार्या नास्ति।

अस्मिन् द्वौ विरुद्धौ पदार्थौ एकस्मिन्नेव आश्रये वर्णितौ स्तः। प्रथमतः विरोधस्य प्रतीतिः भवति, किन्तु यदैव प्रसङ्गप्राप्तस्य अर्थस्य स्पष्टता भवति तदैव विरोधः उपशमितः। अर्थात् अस्मिन् विरोधः शब्दाश्रितः भवति, न तु अर्थाश्रितः। अनेनालङ्कारेण कविः द्वयोः पदार्थयोः बाह्यवैषम्यान् प्रदर्शयन् सहृदयानां मनस्सु कौतूहलस्य भावमुत्पादयति।

विरोधाभासालङ्काराय आवश्यकमस्ति यत् विरोधस्य नियोजने तस्य परिहाराय अपि स्थानं स्यात् अन्यथा तत्र अलङ्कारत्वं न सम्भविष्यति।

पं. अम्बिकादत्तव्यासेन शिवराजविजये विरोधालङ्कारेण नेतृगतवैशिष्ट्याभिव्यक्तेः रमणीयोल्लेखः क्रियते। अल्पावस्थायाम् अतिपराक्रमिणोः गौरसिंहश्यामसिंहयोः पराक्रमशीलतां कविः निम्नप्रकारेणाभिव्यनक्ति–

**'वत्सौ गौर–श्यामौ! जानेऽहं......बालावप्यबालपराक्रमौ।'**[2]

कुटीराध्यक्षस्य उपर्युक्ते कथने बालकः महाबली चेति द्वे विरोधाभासने प्रतीयेते, परन्तु पूर्ववर्णितेन गोरसिंहश्यामसिंहस्य च पराक्रमसम्बन्धिप्रसङ्गेन ज्ञायते यत् गौर-श्यामौ बालौ अपि पराक्रमिणौ स्तः। अतः विरोधः उपशमितः। वस्तुतः गुणः कालस्य अवस्थायाः चानुगामी न तिष्ठति। प्रायः लोके दृश्यते यत् विशिष्टासु परिस्थितिषु मानवेषु अद्भुतस्य साहसस्य सञ्चारो भवति। अनेन प्रकारेण केचन एतादृशाः अपि जनाः भवन्ति येषु बाल्यावस्थायामेव प्रकृतिजन्यो विशेषो गुणः परिलक्ष्यते। अनेन विरोधकथनेन कविः गौरस्य श्यामस्य च एतमेव गुणमभिव्यनक्ति-

**मुनिवेषोऽपि किञ्चित् कोपकषायितनयनः,**
**कर–कम्पित–कृपा–कृपण–कृपाणो महादेवमारिराधयिषु–**
**स्तपस्विवेषोऽर्जुन इव शान्तवीररसद्वयस्नातः**
**सपदि समागतवान् तन्निकटे.........।**[3]

अस्मिनुदाहरणे मुनिवेषस्य कोपकषायितनयनत्वात् शान्तवीरयोश्च एकस्मिन्नेव आश्रये स्थितिकारणेन च विरोधाभासस्य प्रतीतिः भवति। परन्तु प्रसङ्गेन स्फुटमेतत् यत् स्वशत्रु–यवनयुवकं दृष्ट्वा एव तस्य ब्रह्मचारिणः बालकस्य नेत्रे क्रोधाविष्टे तथा च यवनयुवकस्य जिघांसया सः वीररसस्नात इव प्रतीयते। अनेन प्रकारेण विरोधस्य परिहारः अभवत्।

उदयपुरस्य राजपूतस्त्रीणां प्रशंसासम्बन्धि निम्नमुदाहरणं विरोधाभासस्य अति रमणीयं निदर्शनमस्ति–

**को न जानीते उदयपुररःज्यम्? यदीयचित्रपूरदुर्गे**
**परस्सहस्राः क्षत्रियकुलाङ्गनाः शारदा इव विशारदाः।।**[4]

अत्र 'विशारदा' शब्दः श्लेषयुक्तः अस्ति। प्रथमतः तु विशारदायाः अर्थः- -विगता शारदा यस्याः अर्थात् मूर्खा प्रतीयते, परन्तु प्रसङ्गेन स्पष्टं भवति यत्



अत्र राजपूतस्त्रीणां वैशिष्ट्यमुच्यते, विशारदायाः द्वितीयः अर्थः 'पण्डिता' अस्ति। अतएव विरोधस्योपशमनं भवति।

बालको भूत्वापि गाम्भीर्यगुणेन ओतप्रोतस्य रघुवीरसिंहस्य प्रशंसां कुर्वन् कविः–

**नूनं बालोऽप्येषोऽबालहृदयोऽस्ति, तदस्मै कथयिष्याम्यखिलवृत्तान्तम्।**[5]

अत्र 'बालः अबालहृदयः' अत्र एकस्मिन्नाश्रये बालः अबालः इति द्वयोः विरोधिनोः पदार्थयोः स्थितिः कथितास्ति। अतएव विरोधाभासः अस्ति। परन्तु प्रसङ्गेन कथ्यते यत् दुर्गाधीशः विभिन्नप्रकारेण वार्तालापेन तस्य गाम्भीर्यपरीक्षणानन्तरमेव तम् अबालहृदयम् अकथयत्। अतः विरोधस्य परिहारो भवति। वस्तुतः बालकाः चञ्चलप्रकृतयः भवन्ति, येभ्यः गम्भीरतायाः अपेक्षा न सम्भवति। अतः 'आयुषा बालः व्यवहारेण अबालः वृद्धः वा' द्वौ विरोधौ दृश्येते। परन्तु रघुवीरस्य गाम्भीर्यपूर्णविचारान् श्रुत्वैव दुर्गाधीश तं 'बालोऽप्येषोऽबालहृदयः' इति कथयति। शिवाजीमहोदयस्य व्यक्तित्ववैशिष्ट्यस्य अभिव्यक्तिसम्बद्धाः केचन विरोधालङ्काराः निम्नोक्तरीत्या सन्ति–

**परितस्य तस्यैव खर्वामप्यखर्वपराक्रमां मूर्तिं दर्शं दर्शं।**[6]

शिवाजीमहोदयस्य आकृतिः खर्वामप्यखर्वपराक्रमयुक्ता अस्ति। अत्र अखर्वविशेषणेन विरोधः प्रतीयते, वस्तुतः अत्र विरोधः नास्ति, यतः शिवाजीमहोदयस्य आकृतिः लघ्वी भूत्वाऽपि पराक्रमे अति विशाला अस्ति। बाह्यं जगत् अल्पसाधनेन अनल्पं साध्यं न अपेक्षते। अतः अनेन वैषम्येण पाठकानां मनःसु कौतूहलभावः जागरितः भवति। इदं कौतूहलमेव अस्यालङ्कारस्य मूलतत्त्वं तथा च कवेरभीष्टमस्ति।

**श्याममपि यशःसमूहश्वेतीकृतत्रिभुवनाम्।**[7]

कृष्णताधवलीकरणे च आपाततः परस्परं विरुद्धे भवतः, परन्तु धवलीकरणस्य कार्यं कीर्तिगतश्वेतिमया भवति, न च शरीरगतश्वेतिमया। अतः विरोधस्य परिहारो भवति।

**कुशासनाश्रयामपि सुशासनाश्रयां।**[8]

अत्र 'कुशासन' शब्दे श्लेषोऽस्ति। यत्र कुत्सितं शासनं भविष्यति तत्र शोभनराष्ट्रस्य स्थितिः न सम्भविष्यति, परन्तु कुशानाम् आसनम् एषः पदच्छेदः,तेन कारणेन विरोधः उपशमितः।

**पठनपाठनादिपरिश्रमानभिज्ञामपि नीतिनिष्णाताम्।**[9]

कस्मिन्नपि विषये नैपुण्यप्राप्त्यर्थं पठन पाठनादिरूपः परिश्रम आवश्यको भवति, किं च पठन-पाठनादिपरिश्रमेण रहितस्य जनस्य नीतिनिष्णातता असक्ता, अतः विरोधकथनमस्ति। किन्तु अवसरानुसारेण 'सन्धि' इत्यादि राजनीतिकविषयेषु निष्णातः एषः विचारः तेन तस्मिन् कृते विरोधस्य शान्तिर्भवति।

**स्थूलदर्शनामपि सूक्ष्मदर्शनाम्।**[10]

अत्र एकस्मिन्नेव आंश्रये (शिवाजीमहोदये) स्थूलसूक्ष्मयोः कथनस्य विरोधोऽस्ति। परन्तु एषा सूक्ष्मता चक्षुरिन्द्रियसाध्यदर्शने न भूत्वा कर्त्तव्याकर्त्तव्ययोः विचारेष्वस्ति। अतः नास्ति विरोधः।

**ध्वंसकाण्डव्यसनिनीमपि धर्मधौरेयी।**[11]

अर्थात् शिवाजीः हिंसाव्यसनी भूत्वाऽपि धर्मभारधारणे समर्थोऽभवत्। यः ध्वंसव्यसनी अस्ति सः धर्मपालनं केनोपायेन करिष्यति? परन्तु अस्य निराकरणं भवति यत् शिवाजी विधर्मिणः विध्वंसनेन सनातनधर्मस्य पालनं करोति।

**कठिनामपि कोमलाम्।**[12]

कठिनस्य कोमलस्य च समाने आश्रये स्थितिः विरोधकथनमस्ति। परन्तु शिवाजीः शारीरिकदृष्ट्या हृष्टपुष्टो भूत्वाऽपि हृदयगतिदृष्ट्या अतिकोमलः। अतः विरोधस्य उपशमनं भवति।

**उग्रामपि शान्तां शोभित-विग्रहामपि दृढ़-सन्धि-बन्धां कलितगौरवामपि कलित लाघवां...मूर्ति दर्श दर्श....।**[13]

उग्रता शान्तिश्च परस्परविरोधिन्यौ स्तः, अतः अनयोः एकस्मिन्नाश्रये स्थितिः विरोधकथनमस्ति। परन्तु शिवाजीः दुर्धर्षविषयेषु उग्रो भूत्वाऽपि दयादिगुणैः युक्तः शान्तस्वरूपः आसीत्। अतः विरोधो नास्ति।

**शोभितविग्रहामपि दृढ़सन्धिबन्धां।**[14]

अस्मिन्नुदाहरणे विग्रहः सन्धिश्च शब्दौ श्लेषयुक्तौ। अतः शोभनशरीरे सति तत्र दृढ़सन्धिबन्धस्थितिः विरोधकथनमस्ति। परन्तु अत्र विग्रहस्य अर्थः सन्धि-प्रस्तावः, अवयवसन्धानमिति द्वौ स्तः। अतः विरोधो नास्ति।



**कलितगौरवामपि कलित-लाघवां.....।**[15]

गौरवं लाघवमपि इति परस्परं विरुद्धे स्तः। परन्तु गौरवशब्दः गाम्भीर्ये अर्थे लाघवञ्च चातुर्ये अर्थे प्रयुक्ते सति विरोधो नास्ति। तात्पर्यमस्ति यत् तस्मिन् गाम्भीर्यस्य आधिक्यं तथा चातुर्यस्य लाघवमासीत्। अतः विरोधस्य उपशमनं भवति।

उपर्युक्तविवेचनेन सिद्ध्यति यत् पं. अम्बिकादत्त व्यासः विरोधाभासालङ्कारस्य निरूपणे अतिकुशलोऽस्ति।

कविः पदार्थद्वये बाह्यवैषम्ये उत्पन्ने तद्वैषम्यस्य परिहाराय अपि निपुणो विद्यते। अस्मिन्नलङ्कारे कविः मस्तिष्के विरोधः ततः परिहारः च द्वौ सहैव उपजायेते, यथा–

**कुशासनाश्रयामपि सुशासनाश्रयां...** अत्र सुशासनेन सह कुशासनस्य प्रयोगेणैव सह तस्य विरोधपरिहाराय कुशानाम् आसनम् एषः विग्रहोऽपि कवेः मस्तिष्के पूर्वमेव विद्यमानोऽस्ति। केषांचिद् विदुषां मतमस्ति यत् कविः केनचित् विशिष्टेन अभिप्रायेणैव विरोधं वियोजयति।

अस्मिन् सन्दर्भे शिवराजविजये विरोधालङ्कारस्य अन्वेषणेन स्पष्टं भवति यत् कविः नेतृगतवैशिष्ट्यस्य अभिव्यक्त्यर्थमेव विरोधालङ्कारस्य नियोजनमकरोत् इति।

❖

## सन्दर्भाः

1. अलङ्कारसर्वस्वम्, सू.सं.41
2. शिवराजविजयः - तृतीयः निश्वासः, पृ.120-121
3. तथा, प्रथमः निश्वासः, पृ.37
4. तथा, तृतीयः निश्वासः, पृ.125
5. तथा, चतुर्थः निश्वासः, पृ.175
6. तथा, द्वितीयः निश्वासः, पृ.60
7. तथा, द्वितीयः निश्वासः, पृ.60-61
8. तथा, द्वितीयः निश्वासः, पृ.61
9. तथा, द्वितीयः निश्वासः, पृ.61
10. तथा, द्वितीयः निश्वासः, पृ.61
11. तथा, द्वितीयः निश्वासः, पृ.61
12. तथा, द्वितीयः निश्वासः, पृ.61
13. तथा, द्वितीयः निश्वासः, पृ.61
14. तथा, द्वितीयः निश्वासः, पृ.61
15. तथा, द्वितीयः निश्वासः, पृ.61-62

❖



# विभिन्नदार्शनिकाभिमतशाब्दबोधविचारः

डॉ. दिव्यचेतन ब्रह्मचारी

## भूमिका

शाब्दबोधः इति विवेचनात् प्राक् तद्विशेषणीभूतः यः शब्दः तस्य स्वरूपं किमिति चिन्तनीयम्। नियमः वर्तते 'नागृहीतविशेषणा बुद्धिः विशेष्यमवगाहते।'

इह खलु समोऽपि लौकिको वैदिको वा व्यवहारः शब्दानां माध्यमेनैव प्रचलति। सर्वे प्राणिनः स्वाभिप्रायं परस्परं विज्ञापयितुं शब्दमेवाश्रयन्ते। तत्राज्ञानभयत्वात् पशुपक्ष्यादिजीवा विचारयितुमसमर्थाः परञ्च ज्ञानवन्तो मानवाः प्रतिक्षणं व्यवहारमार्गे साधनीभूतं शब्दं कथमुपेक्षिष्यन्त इति विचारपराणां विदुषां मनसि शब्दज्ञानविषयिणी जिज्ञासा नैसर्गिकी एव। अतः सः शब्दः क इति विचार्यते।

## शब्दः

शपन्ति व्यपदिशन्ति आह्वयन्ति वानेन वाग्व्यापारेण स खलु शब्द उच्यते। ध्वनिसमुदायं हि प्रायः शब्दपदेन व्यवहरन्ति लौकिकाः। शब्दशास्त्रिभिरपि ध्वन्यात्मकः शब्दोऽनुमोदितः। प्रवक्तुः प्रतिपत्तुश्च परस्परं व्यवहारसम्पादनार्थं शब्दाः प्रयुज्यन्ते। प्रयोक्ता स्वकीयाम् अन्तःस्थां भावनां प्रकटयितुं शब्दभावनां कुरुते। सा शब्दभावना एव प्रतीतपदार्थकेन ध्वन्यात्मकेन शब्दरूपेण प्रवर्तते लोके। शब्दानां ध्वन्यात्मकं रूपं व्यावहारिकस्वरूपं भवति। पाणिनिना[1] शब्दशास्त्रीयप्रक्रियां सम्पादयितुं ध्वन्यात्मकं व्यावहारिकमेव शब्दस्वरूपं समाश्रितम्। पाणिनिरन्यदपि एकं शब्दस्वरूपं निर्दिदेश, यदस्ति शब्दानां तात्त्विकं शब्दस्वरूपम्। तात्त्विकमेतच्छब्दस्वरूपं भाषावैज्ञानिकमपि वक्तुं शक्यते। पतञ्जलिरर्थपदेन[2] तच्छब्दस्वरूपं व्याचष्ट यच्छब्दभावनारूपेण वक्तरि पूर्वत एव सन्तिष्ठते। अग्रे भाषातात्त्विकमिदं शब्दस्वरूपमेवाऽस्माभिः स्फोटपदेन

व्यवहरिष्यते। यः ध्वनिसमुदायः कञ्चनाऽर्थप्रत्ययं जनयितुं समर्थः स एव शब्दपदव्यवहार्यो भवति। अर्थप्रत्ययाऽनुत्पादकः केवलं श्रोत्रगृहीतो ध्वनिः शब्दशास्त्रे शब्दपदाऽनर्हो भवति। अत्र द्विविधं नाम शब्दस्वरूपं निर्दिष्टम्। तच्च–

(1) व्यावहारिकं शब्दस्वरूम्।

(2) भाषातात्त्विकं भाषावैज्ञानिकं वा शब्दस्वरूपम्।

कस्मैचिदपि शब्दशास्त्रिणे उभयविधमपि शब्दस्वरूपमभिमतं भवति। शब्दपूर्णतायै उभयमपि भवति आवश्यकम्। एतदुभयमपि शब्दस्वरूपं संक्षेपेण प्रस्तूयतेऽत्र।

**(1) व्यावहारिकं शब्दस्वरूपम्—**समेऽपि लौकिकाः व्यवहाराः व्यावहारिकेणैव शब्दस्वरूपेण सम्पाद्यन्ते।

"शपिभ्यां वदनाविति"[3] सूत्रेण उणादिकारो व्यवहारसाधनं हि शब्दं स्वीकुरुते। शब्दपदव्युत्पत्त्या एतदनुमीयते यत् प्रारम्भिकी शब्दप्रवृत्तिः नामकरणात्मिका सम्बभूव। उणादि व्याचक्षाणः दशपाद्युणादिवृत्तिकारः आह्वानकरणं शब्दं व्याचष्ट।[4] स्वामिदयानन्दोऽपि स्वकीयोणादिव्याख्यायां तथाभूतमेव शब्दं व्याचकार।[5]

पतञ्जलिनाऽपि चर्चितोऽयं लोकप्रतीतिजनको व्यावहारिकः शब्दो ध्वनि-समुदायरूपः[6] लोक ध्वनिं कुर्वन् बालक उच्यते "शब्दकारी खल्वयं माणवक" इति। अतः शब्दपदेन लोके प्रतीतपदार्थको ध्वनिविशेषः शब्दः ख्यातः। तेषां शब्दानामनेन पाणिनीयेन तन्त्रेण अनुशासनं क्रियत इति पतञ्जलेः तत्रत्योऽभिप्रायः।

अत्रेदं न विस्मर्तव्यं यन्नादे ध्वनिसमुदाये वा शब्दत्वव्यपदेशः शब्दभावनात्मके स्फोटरूपेऽन्तःशब्दे, बाह्ये च ध्वन्यात्मके शब्दे अभेदबुद्ध्या एव क्रियते। भाषातात्त्विकदृष्ट्या प्रतीत्यजनकस्य ध्वनिसमुदायस्यापि शब्दत्वेनाऽनभिप्रेतत्वात्। प्रयोगदृष्ट्या हि शब्दानां व्यावहारिकं स्वरूपं समाश्रीयते। शब्दस्य स्वरूपग्राहकः प्रयोग एव भवति। लौकिकप्रयोगं विना शब्दस्य रूपनिर्ग्रहो न भवति कथञ्चिदपि इति पतञ्जलिना व्याख्यातम्।

तथा हि रूपनिग्रहश्च शब्दस्य नान्तरेण लौकिकप्रयोगं[7] शब्दस्येदं व्यावहारिकं स्वरूपमेवाऽभिप्रेत्य आचार्य उपवर्षः ध्वनीनां शब्दत्वं स्वीचकार। मीमांसासूत्र व्याचक्षाणः शबरस्वामी उपवर्षमतमन्ववदत्। तथाहि–अथ[8] गौरित्यत्र कः शब्दः?



गकारोकारविसर्जनीया इति। एतद्रीत्या गौरित्यत्र गकारौकारविसर्जनीयरूप-ध्वनिसङ्घात एवास्ति शब्द इति भगवानुपवर्षः। वादरायणसूत्रं भाषमाणः आचार्यः शङ्करोऽपि[9] इदमेव मतमुपवर्षस्य अभिमतमित्यवोचत्। भगवत उपवर्षस्य इदं निरुक्तं मतं वस्तुतः शब्दानां प्रायोगिकरूपमात्रं संलक्ष्यैव विद्यते। यदि ततः प्राक् स्फोटात्मकः आन्तरः शब्दो न भवेत् तदा नियतार्थे नियतस्य ध्वन्यात्मकस्य शब्दस्योच्चारणमपि न सम्भवेत्।

शब्दं परिभाषमाणेन भगवता पतञ्जलिनोक्तम्–

श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः[10] इति।

लक्षणेनानेन शब्दे तथ्यत्रयं निर्दिश्यते–

1. श्रोत्रोपलब्धिः, 2. बुद्धिनिर्ग्राह्यः, 3. प्रयोगेणाभिज्वलितश्चेति।

## भाषातात्त्विकं शब्दस्वरूपम्

शब्दाभिव्यक्तेः साधनं हि ध्वनिरस्ति। वक्तुः पूर्वनिश्चितं शब्दसंस्कारं प्रकटयति ध्वनिसंघातः। स्फोटध्वन्योरभेदबुद्ध्या ध्वनिसमुदाये शब्दत्वं व्यपदिश्यते। प्रतीतपदार्थके ध्वनौ शब्दत्वं स्वीकुर्वाणस्य पतञ्जलेरपि अयमेवाशयः। पतञ्जलेरभिप्रायं स्पष्टयन् नागेशः तत् प्रायोगिकं शब्दस्वरूपं व्याचष्ट। तथाहि–लोके व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वाद् वर्णरूपध्वनि-समूह एव शब्द इत्यर्थः।[11] तात्त्विकं शब्दस्वरूपन्तु ध्वन्यतिरिक्तमेकमन्यत् पाणिनीयतन्त्रे मौलिकरूपेण एतदुपवर्णित। सम्प्रत्ययनिमित्तकः ध्वनिसमुदायः भवति वैज्ञानिकः शब्दः, येनोच्चारितेन शब्देन प्रतिपत्तुः शब्दमनुसन्दधानस्य पतञ्जलेरयमेवाऽभिप्रायः "येनोच्चारितेन सास्नालाङ्गूलक-कुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः"[12] पतञ्जलेः शब्दलक्षणशब्दस्य स्फोटात्मकमान्तरिकं स्वरूपं संकेतयति इति। अत्रेदं वक्तुं शक्यते यच्छब्दस्य प्रयोजनद्वयं भवति। ज्ञानं प्रयोगश्च। ज्ञानमस्ति स्फोटरूपं प्रयोगश्च ध्वन्यात्मकः। एकः पूर्वपरयोरिति सूत्रं भाषमाणः पतञ्जलिः शब्दज्ञानं शब्दप्रयोगञ्च अभीप्सितफलप्रदं व्याचष्ट।

तथा हि शब्दस्यापि ज्ञाने प्रयोगे च प्रयोजनमुक्तम्। किम्? एकः शब्दः सम्यग ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति। शब्दस्वरूपप्रसङ्गादत्र

एतदप्यवधेयम्-प्रयोगेणाभिज्वलितः श्रावणः शब्दः अनुशासनदृष्ट्या द्विविधः-व्युत्पन्नः अव्युत्पन्नश्च। तत्र व्युत्पन्नः शब्दः एकेषामाचार्याणां मते स्वीक्रियते। अव्युत्पन्नश्चापरेषाम्। तथा हि- वाचकः उपादानं स्वरूपवान् व्युत्पत्तिपक्षे। अव्युत्पत्तिपक्षे तु अर्थाव्यवहितं समाश्रितं निमित्तं शब्दव्युत्पत्तिकर्मणि प्रयोजकं, तत्र शब्दानां नियतं व्युत्पत्तिनिमित्तं भवति। तदेव च शब्दानां प्रवृत्तिनिमित्तं बोधयति। व्युत्पत्तिपक्षे गवादिरूपार्थे यद् गमनादिक्रियारूपं निमित्तं स्थितम्, तदेव गवादिशब्दस्य व्युत्पत्तिकर्मणि प्रयोजकम्। गोशब्दस्य व्युत्पत्तेः मूलकारणं गमनरूपा क्रिया एव, गच्छतीति गौरिति[13] व्युत्पत्तेः। शब्दव्युत्पत्तिः प्रयोक्तृसामर्थ्यमाश्रयते। प्रयोक्तृभिः अर्थस्य योऽवस्थाविशेषो दृष्टः स एव तद्वाचकस्य शब्दस्य भवति व्युत्पत्तिनिमित्तम्। तथा चोक्तं हरिणा-

**अन्यथा च समाख्यानमवस्थाभेददर्शिभिः।**
**क्रियते किंशुकादीनामेकदेशेऽवधारणात्।।**[14]

यथा वृक्षवल्मीकादिभिः यथाऽन्वान्ख्यानं लोके क्रियते तथा शब्दव्युत्पत्तावपि अर्थसहचारिभिः अनेकैः निमित्तैः शब्दो व्युत्पाद्यते। अथ यद्यपि शब्दस्वरूपं पूर्वं विस्तृतरूपेण विचारितं तथापि संकेतरूपेण पृथक् पृथग् दर्शनाभिप्रेतस्वरूपं तावद् विचार्यते-

## विभिन्नदार्शनिकमते शब्दस्वरूपविवेचनम्

**न्यायदर्शने-**श्रोतग्राह्यो गुणो शब्दः।[15] स द्विविधः-ध्वन्यात्मको वर्णात्मकश्च, ध्वन्यात्मकस्तावत् शब्दो भेर्यादौ प्रसिद्धः वर्णात्मकश्च लोकवाग्व्यवहारविषय। स शब्दः अनित्यः। उक्तं च महर्षिणा गौतमेन आदिमत्वादैन्द्रियकत्वात् कृतवदुपचाराच्चेति गौतमसूत्रम्।[16] अत्र भाष्यम् आदिः योनिः कारणम् आदीयतेऽस्मादिति कारणवदनित्यं दृष्टम्। संयोगविभागजश्च शब्दः कारणत्वादनित्यः किमुत्पत्तिकारणम्, संयोगविभागौ शब्दस्य आहोस्विदभिव्यक्तिकारणम्। इत्यत आह-ऐन्द्रियकत्वादिति। इन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियकः शब्दोऽनित्यः इन्द्रियत्वात् रूपादिवत्।

**वैशेषिकदर्शने-**वैशेषिकेऽपि शब्दस्यानित्यत्वमाह, तथाहि सूत्रं 'गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम्।' तद्व्याख्या चेत्थम् सतः नित्यस्य शब्दस्य लिङ्गाभावात्। शब्दनित्यत्वसाधकप्रमाणाभावादनित्यम्।



**सांख्यदर्शनाभिमतं शब्दस्वरूपम्-**सांख्यदर्शने परिगणितेषु पञ्चविंशतितत्त्वेषु पञ्चतन्मात्रमस्ति विकारोऽयमहंकारस्य। तेष्वेवान्यतमं।[17] शब्दतन्मात्रम्, अस्मादेव भूताकाशस्य भवत्युत्पत्तिः, तथा हि शब्दतन्मात्रादाकाश उत्पद्यते इति गौडपादभाष्यम्, अनेन प्रतीयतेऽस्मिन् दर्शने शब्दः द्रव्यम्, न तु गुणः। स च शब्दः नित्यः सत्कार्यत्वाद्।

**मीमांसकाभिमतशब्दस्वरूपम्-**भगवतोपवर्षेण[18] वर्णा एव तु शब्दः उक्तः। अतः वर्णा एव शब्दस्य स्वरूपाणि नान्यत् स च वर्णः नित्यः उक्तः जैमिनीन्यायमालायाम्। तथा च

**अबाधितप्रत्यभिज्ञाबलाद् वर्णस्य नित्यता।**
**उच्चारणप्रयत्नेन व्यज्यतेऽसौ न जन्यते।।**[19]

**काव्यशास्त्रीयशब्दस्वरूपम्-**काव्यशास्त्रस्य गवेषणेन ज्ञायते यदालङ्कारिकाः शब्दस्येत्थं स्वरूपम् प्रतिपादयन्ति। तथा हि अर्थप्रतीतये गीतः शब्द इत्यभिधीयते।[20] विभक्त्युत्पत्तये योग्यः शास्त्रीयशब्दः इष्यते।[21] स च शब्दः त्रिधा वाचकः लक्षकः व्यञ्जकश्चेति। क्रमेणैतेषां त्रयोऽर्थाः वाच्यलक्ष्यव्यङ्ग्याः, एतेषां प्रतीतिः यथायोग्यमभिधालक्षणाव्यञ्जनाभिः। उक्तं च-

**वाच्यार्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।**
**व्यङ्ग्यो व्यञ्जनया ताः स्युः तिस्रः शब्दस्य शक्तयः।।**[22]

**योगाभिमतं शब्दस्वरूपम्-**भगवता पतञ्जलिना योगशास्त्रं विरचितम्। तत्र समाधिपादान्तर्गतं सूत्रमाह-"तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा संवितर्का समापत्तिः" इति। अत्र व्यासभाष्यम्, तद्यथा गौरिति शब्दो[23] गौरित्यर्थो गौरिति ज्ञानमित्यादि व्याख्यातम्। गौरिति शब्द इति कथनेन पदात्मकः शब्दः प्रतीयते। स च नित्यः। तदेव शब्दस्वरूपम्।

**शाब्दिकाभिमतं शब्दस्वरूम्-**स्फोटवादिनः वैयाकरणाः शब्दस्य नित्यत्वं स्वीकुर्वन्ति। स शब्दः स्फोटरूपः व्यवह्रियते न तु ध्वनिशब्दः। अपितु शब्दगुणः। तथा हि भाष्यम्-एवं तर्हि स्फोटः शब्दः ध्वनिः शब्दगुणः।[24] भाष्यकारेण स्फोटः शब्दः स्वमुखेन प्रतिपादितः। अन्यदपि गौरित्यत्र कः शब्दः? इत्याशङ्क्यान्ते आह-

"येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययः भवति सः शब्दः" अत्र पूर्वापरभाष्यपर्यालोचनया प्रतीयते। शब्दो द्विविधः–1 अभिव्यङ्ग्यः 2. अभिव्यञ्जकश्च। आद्यः स्फोटरूपः। द्वितीयो ध्वनिरूपः। उक्तञ्च वाक्यपदीये–

**द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।**
**एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते।।**[25]

**वार्तिककारोऽपि–**सिद्धे शब्दार्थसम्बन्धे इति वार्तिके[26] सिद्धशब्दः नित्यवाचकः। भगवता पाणिनिना "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्यत्र अर्थवदेव शब्दस्वरूपं गृह्यते इति व्याख्यातम्। भर्तृहरिः शब्दस्वरूपमित्थं प्रतिपादयति- "अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षर" मित्यादिकारिकया शब्दस्वरूपं वास्तविकं ब्रह्म वर्तते। अन्यत् सर्वमौपाधिकम्। नागेशः मञ्जूषायां ननु कोऽयं वृत्त्याश्रयः शब्दः इत्याशङ्क्य वर्णाः प्रत्येकमिति चेत् न इति आक्षेपपुरस्सरं निर्णये आह–सः स्फोटात्मक इति गृहाण।[27] अतः स्फोटात्मकः शब्दः ब्रह्मरूपो नित्यश्च ध्वनिना अभिव्यक्तो भवति।

किं बहुना, विवेचनेन संसारेऽस्मिन् सर्वोऽपि प्रत्ययः व्यवहारश्च शब्देन विना न भवति। अतः हरिणोक्तं वाक्यपदीये–

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।**

तथा च भाष्ये शब्दपूर्वकश्चार्थसम्प्रत्ययः। शब्दस्वरूपस्यावधारणे जाते शाब्दबोधः विविच्यते।

## शाब्दबोधः

शब्दाद् आगतो जातः वा शाब्दः 'तत आगत'[28] इत्यण्। शाब्दश्चासौ बोधः इति शाब्दबोधः। बोधश्च तत्र कश्चिदात्मवृत्तिर्गुणः, तत्पर्याया बुद्धिर्ज्ञानं प्रतिपत्तिरित्याद्याः। तत्रेन्द्रियात्मकप्रत्यक्षप्रमाणजन्यो बोधः प्रत्यक्षम्। यथा अयं घट इति। वह्निव्याप्यो धूमवान् पर्वत इत्यादिपरामर्शरूपानुमानप्रमाणजन्यो बोधोऽनुमानम्। यथा पर्वतो वह्निमानिति। गवादिसादृश्यप्रत्यक्षोद्बुद्धसंस्कारजन्यगोसदृशो गवय इत्यादिवाक्यार्थस्मरण- रूपोपमानप्रमाणजन्यो गवयपदवाच्योऽयमित्यादिशक्तिग्रह उपमानम्। वेदाः प्रमाणम् इत्यादि–शब्दरूपप्रमाणजन्यबोधः शाब्दबोध इत्युच्यते।



तदेवं प्रत्यक्षानुमानोपमानशब्दाश्चत्वारः प्रमाणानि। तज्जन्यास्तु प्रत्यक्षानुमानोपमान- शाब्दाश्चत्वारो बोधाः प्रमा इत्युच्यन्ते। प्रमाणशब्दश्च भावकरणोभयव्युत्पत्त्या ज्ञानबोधको ज्ञानकरणीभूतेन्द्रियादिबोधकश्च। एवमनुमानोपमानशब्दावपि ज्ञानतत्करणोभयवर्तिनौ। एवं प्रत्यक्षशब्दोऽपि।

यस्यार्थस्य बोधो भवति सोऽर्थो विषयः। यथा राज्ञः पुरुषः इति ज्ञाने शाब्दिकमते राजा, स्वस्वामिभावः, पुरुषश्च विषयाः, विभक्त्यर्थस्य पदार्थभूतस्यापि संसर्गतया भानाभ्युपगमात्। अत एव संसर्गतावादिपदेन शाब्दिका गृह्यन्ते। न्यायनये तु राज्ञः पुरुषः इत्यत्र राजा निरूपितत्वं स्वत्वम् आश्रयत्वं पुरुषश्च विषयाः।

तत्र शाब्दिकमते राजपदार्थस्य षष्ठ्यर्थीभूतस्वस्वामिभावसम्बन्धेन पुरुषपदार्थेऽन्वयः इति स्वस्वामिभावसम्बधेन राजविशिष्टः पुरुष इति बोधाकारः। न्यायनये तु राजपदार्थस्य निरूपितत्वसम्बन्धेन षष्ठ्यर्थस्वत्वेऽन्वयः, स्वत्वस्य च आश्रयत्व-सम्बन्धेन पुरुषेऽन्वय इति राजनिरूपितस्वत्ववान् पुरुष इति बोधः।

अन्वयपदं च भावव्युत्पत्त्या क्रियापरं, करणव्युत्पत्त्या च सम्बन्धपरम्। यथा 'राज्ञः पुरुष' इत्यत्र स्वस्वामिसम्बन्धेनान्वय इत्यत्रान्वयपदम्। अत एव अन्वयबोधपदेन शाब्दबोध उच्यते। पदार्थद्वयसम्बन्धविषयकबोधे रूढत्वाच्च नान्यत्रान्वयबोध इति व्यवहारः। तथा च शाब्दबोधे द्विविधो विषयो भासते–

1. पदार्थः, 2. पदार्थसम्बन्धश्च। सम्बन्ध एव संसर्ग इत्युच्यते। घटस्य ज्ञानं जातमित्यत्र घटस्य ज्ञाने सम्बन्धः षष्ठ्या प्रतिपाद्यते एवं घटोऽयमिति ज्ञाने घटो विषय इति व्यवहारात् केनचित् सम्बन्धेन घटस्य ज्ञानवृत्तिता वाच्या। तथा च ज्ञानस्य विषये विषयत्वं संसर्गः। विषयस्य ज्ञाने तु विषयित्वम् अर्थात् स्वनिष्ठविषयतानिरूपकत्वं संसर्गः। स च सम्बन्धो ज्ञानेन विषयेण वा निरूपणीय इति विषयतानिरूपकं ज्ञानम् एवं च विषयितानिरूपकश्च विषयः। तथा च विषयानुयोगिको ज्ञानप्रतियोगिकः सम्बन्धो विषयता। यस्य सम्बन्धः स प्रतियोगी। यत्र सम्बन्धः सोऽनुयोगीत्युच्यते। ज्ञानानुयोगिको विषयप्रतियोगिकश्च सम्बन्धो विषयिता। तत्र विषयता विषयस्वरूपा, ज्ञानस्वरूपा, अतिरिक्ता वेति मतत्रयम्।

'राज्ञः पुरुषः' इति ज्ञाने राज्ञः पुरुषश्च विषयत्वेन राजपदार्थनिष्ठविषयता-

निरूपकं पुरुषपदार्थनिष्ठविषयतानिरूपकं च तथा स्वस्वामिभावरूपसंसर्गनिष्ठ - सांसर्गिकविषयतानिरूपकं च। एवं संयोगसम्बन्धेन घटवद्भूतलमिति प्रत्यक्षात्मकं ज्ञानं घटसंयोगभूतलत्रितयनिष्ठविषयतानिरूपकम्। तथा घटः संयोगो भूतलमिति समूहालम्बनप्रत्यक्षमपि तादृशविषयतानिरूपकमेवेति घटवद्भूतलमिति प्रत्यक्षापेक्षया घटसंयोगभूतलानीति प्रत्यक्षस्य वैलक्षण्यानुपपत्तिः, विषयतावैलक्षण्येनैव ज्ञानवैलक्षणस्य वाच्यत्वाद्। अतो घट वद् भूतलमितिज्ञानीयघटसंयोगभूतलनिष्ठविषयतानां विनिगमना-विरहात् परस्परं निरूप्यनिरूपकभावः स्वीक्रियते।

तथा घटवद्भूतलमिति ज्ञानं घट निष्ठविषयतानिरूपितसंयोगनिष्ठविषयता-निरूपितभूतलनिष्ठविषयतानिरूपकभूतलनिष्ठविषयतानिरूपितसंयोगनिष्ठविषयतानिरूपित-विषयतानिरूपकघटनिष्ठविषयतानिरूपकसंयोगनिष्ठविषयतानिरूपकभूतलनिष्ठ-विषयतानिरूपकं भूतलनिष्ठविषयतानिरूपकसंयोगनिष्ठविषयतानिरूपकघटनिष्ठ-विषयतानिरूपकं वा भवति।

एवं हि घटभूतलसंयोग इति ज्ञानापेक्षया घट वद्भूतलमिति ज्ञानस्य वैलक्षण्यं सिद्धम्। आद्ये घटादिविषयतानां निरूप्यनिरूपकभावनापन्नत्वात् द्वितीये तदापन्नत्वाच्च। परन्त्वेवमपि घटवद्भूतलमिति प्रत्यक्षभूतलवान् घट इति प्रत्यक्षयोर्वैलक्षण्यानुपपत्तिः, उभयोः समानविषयतानिरूपकत्वात्। एतदर्थं प्रोक्तज्ञानीयविषयतयोर्वैलक्षण्यमभ्युपगम्यते। तच्च वैलक्षण्यं विशेष्यतात्वप्रकारतात्वरूपमेव। तथा च घटवद् भूतलमित्यत्र घटनिष्ठविषयता प्रकारतारूपा भूतलवान् घट इति ज्ञाने तु घटविषयता विशेष्यतारूपेति तयोर्वैषम्यात् उक्तज्ञानयोर्वैषम्यं सिद्ध्यति।

यद्यपि एकत्रैव विषयताया वैलक्षण्याऽभ्युपगमेन निर्वाहः तथापि अस्यामेव वैलक्षण्यमस्तु अन्यस्यामेव वेत्यत्र विनिगमनाविरहात् सर्वत्र विषयतासु वैलक्षण्यं स्थीयते। तथा च घटवद्भूतलमिति ज्ञानं घटनिष्ठप्रकारतानिरूपितसंयोगसम्बन्ध-निष्ठसांसर्गिक विषयतानिरूपित-भूतलनिष्ठविशेष्यतानिरूपकम्। भूतलनिष्ठविशेष्यता-निरूपित-संयोगनिष्ठसांसर्गिक-विषयतानिरूपितघटनिष्ठप्रकारतानिरूपकं घटनिष्ठ-प्रकारतानिरूपकसंयोगनिष्ठसांसर्गिकविषयतानिरूपकघटनिष्ठप्रकारतानिरूपकं च भूतलवान् घट इति ज्ञानन्तु भूतलनिष्ठप्रकारतानिरूपकं घटनिष्ठविशेष्यतानिरूपकं चेति तयोर्भेदः। ज्ञाताज्ञातभेदेन द्विविधोऽर्थः शाब्दबोधे भासते।



यद्यपि शब्दप्रयोगोऽज्ञातज्ञापनार्थ एव तथापि ज्ञातमर्थमनवलम्ब्य अज्ञातज्ञापनं न संभवति। अतो ज्ञातस्याप्यर्थस्य शाब्दबोधे विषयत्वमावश्यकम्। तत्र यं ज्ञातमर्थमवलम्ब्य अज्ञातार्थज्ञापनं क्रियते स एव उद्देश्य इत्युच्यते। तत्रोद्देश्यतार्थ-विषयतापूर्वमज्ञातस्तु विधेय एवापूर्व इत्यप्युच्यते।

## विभिन्नदार्शनिकाभिमतशाब्दबोधप्रकाराः

**नैयायिकाः–**प्रथमान्तार्थमुख्यविशेष्यकं[29] शाब्दबोधं नैयायिकाः स्वीकुर्वन्ति। तथा च तिबादिप्रत्ययानां कृतौ[30] शक्तिः, फलव्यापारौ धात्वर्थौ तेन 'देवदत्त ओदनं पचति' इति वाक्यात् ओदनकर्मकविक्लित्त्यनुकूलवर्तमानकालिककृतिमान् देवदत्तः। अत्र ओदनपदोत्तरद्वितीयायाः अर्थः कर्मत्वम्, पच्धातोः विक्लित्तिफूत्कारादिरर्थः। अनुकूलत्वं संसर्गमर्यादया[31] भासते, लटो वर्तमानत्वमाख्यातस्य कृतिः। आश्रयत्वञ्च संसर्गमर्यादया भासते। तेन पूर्वोक्तः शाब्दबोधः जायते। अत्र विशिष्टशाब्दबोधः इत्थम्-तण्डुलपदार्थस्य स्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन अमर्थाश्रयेऽन्वयः, आश्रयस्य च स्वनिष्ठाधारतानिरूपिताधेयतासम्बन्धेन फलेऽन्वयः, फलस्य च स्वनिष्ठजन्यता-निरूपितजनकतासम्बन्धेन कृतावन्वयः, कृतेश्च स्वनिष्ठाधेयतानिरूपिताधारतासम्बन्धेन प्रथमान्तदेवदत्तादिपदोपस्थाप्येऽन्वयः। आख्यातार्थसङ्ख्यायाश्च स्वनिष्ठपरिच्छेदकता-निरूपितपरिच्छेद्यतासम्बन्धेन प्रथमान्तपदोपस्थाप्य एवान्वयः, तथा च तण्डुलनिष्ठ-कर्मतानिरूपकविक्लित्त्यनुकूलव्यापारजनककृत्याश्रयैकत्वविशिष्टो देवदत्त इति बोधः।

**मीमांसकाः–**वाक्यार्थनिर्णयपराः मीमांसकाः शाब्दबोधे आख्यातार्थभावना-विशेष्यकं[32] प्रतिपादयन्ति। तत्र च मानं "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः, प्रत्ययार्थस्यैव प्राधान्य" इति सूत्रम्। दर्शनेऽस्मिन् आख्यातार्थः–भावना, धातोरर्थः–फलम्, कर्तुराक्षेपः शाब्दबोधे भावना विशेष्या अन्यत् सर्वं कर्त्रादिकं विशेषणम्। तथा हि देवदत्तः काशीं गच्छति इति वाक्यात् देवदत्तकर्तृका वर्तमानकालिकोत्तरदेशसंयोगानुकूला भावना इति शाब्दबोधः। अत्र भावना व्यापारापरपर्याया इत्युच्यते। तथा हि व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया। न च लः कर्मणि इत्यादिसूत्रविरोधः यतो हि सूत्रेण लकाराः कर्तरि कर्मणि विधीयन्ते न तु भावनायाम्, कथं तर्हि आख्यातार्थो भावना इति वाच्यम्, अस्मिन् दर्शने लः कर्मणि इत्यादि[33] सूत्रस्य इत्थमर्थः क्रियते, लकाराः कर्तृत्वे कर्मत्वे च भवन्ति। तथा च कर्तृत्वं भावना न पाणिनीयसूत्रविरोधः।

## शाब्दिकाः

शब्दप्रमाणपरायणाः वैयाकरणाः धात्वर्थव्यापारमुख्यविशेष्यकं शाब्दबोधं स्वीकुर्वन्ति। अत्र मानं भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि इति निरुक्तवचनम्।[34] भाष्यकारेणाप्युक्तं आख्यातेन च क्रियाप्रधानत्वं लक्ष्यते। तथा च फलव्यापारौ धात्वर्थो। अन्यत्रापि–

**फलव्यापारयोर्धातुराश्रये तु तिङस्स्मृताः।**
**फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्।।** इति।[35]

आख्यातार्थौ कतृकर्मणी लः कर्माणि[36] इत्यादि पाणिनीयसूत्रात्। यथा देवदत्तः गृहं गच्छति इति वाक्यात् देवदत्ताभिन्नैककर्तृकः वर्तमानकालिकः उत्तरदेश-संयोगानुकूलव्यापारः। विशेषतया शाब्दबोधश्चेत्थम्–अत्र षट् पदानि सन्ति। 1. देवदत्त, 2. सु, 3. गृह, 4. अम्, 5. गम्, 6. तिप्। पदार्थाश्च देवदत्तत्व 1. देवदत्त 2. समवाय 3. पुँस्त्वत्व 4. पुँस्त्व 5. समवाय 6. एकत्वत्व 7. एकत्व 8. समवाय 9. गृहत्व 10. गृह 11. समवाय 12. क्लीबत्वत्व 13 क्लीबत्त्व 14. समवाय 15. एकत्त्वत्त्व 16. एकत्त्व 17. समवाय 18. कर्मत्व 19. कर्म 20. समवाय 21. गमनत्व 22. गमन 23. समवाय 24. कर्तृत्व 25. वर्तमानकाल 26. कर्तृगतैकत्वत्व 27. एकत्व 28. समवाय 29. देवदत्तस्य कर्तर्यभेदाः 30. अन्यपदार्थस्य गमनक्रियायां कर्मक्रियाभावसम्बन्धश्च। अत्र योजना-

समवायसम्बन्धावच्छिन्नपुँस्त्वनिष्ठा प्रकारतानिरूपिता अथ च समवायसम्बन्धा-वच्छिन्नैकत्वावच्छिन्नैकत्वनिष्ठप्रकारतानिरूपिता च वा समवायसम्बन्धावछिन्ना देवदत्तत्वनिष्ठप्रकारतानिरूपिता देवदत्तनिष्ठा विशेष्यता, तादृशविशेष्यतासमानाधिकरणा या अभेदसम्बन्धावच्छिन्ना देवदत्तत्वावछिन्ना देवदत्तनिष्ठा प्रकारता तादृशप्रकारतानिरूपिता या कर्तृत्वावच्छिन्ना कर्तृनिष्ठा विशेष्यता तादृशविशेष्यतानिरूपिता या परिच्छिन्नत्व-सम्बन्धावच्छिन्ना वर्तमानकालत्वावच्छिन्ना वर्तमानकालनिष्ठा प्रकारता तादृश-प्रकारतानिरूपिता या अभेदसम्बन्धावच्छिन्ना गृहत्वावच्छिन्ना गृहनिष्ठा प्रकारता तादृशप्रकारतानिरूपिता या कर्मत्वावच्छिन्ना कर्मनिष्ठा विशेष्यता तादृशविशेष्यतासमाना-धिकरणा या निष्ठत्वसम्बन्धावच्छिन्ना कर्मत्वावच्छिन्ना कर्मनिष्ठा प्रकारता तादृशप्रकारतानिरूपिता या संयोगत्वावच्छिन्ना संयोगनिष्ठा विशेष्यता तादृशविशेष्यता-



समनाधिकरणा या अनुकूलत्वसम्बन्धावच्छिन्ना संयोगत्वावच्छिन्ना संयोगनिष्ठ प्रकारता उक्तसकलप्रकारतानिरूपिता या क्रियात्वावच्छिन्ना क्रियानिष्ठा विशेष्यता तादृश-विशेष्यताकशालिशाब्दबोधः इति प्राच्याः।

## अत्र नागेशः

प्राचीनवैयाकरणानां मतापेक्षया नागेशमते इयांस्तु विशेषः। ते तु कर्मणि कर्तरि उभयत्रापि व्यापारमुख्यविशेष्यकशाब्दबोधः भवति इति प्रतिपादयन्ति। परन्तु नागेशः कर्मणि प्रत्यये फलविशेष्यकः शाब्दबोध इति स्वीकरोति, तथा कर्तरि प्रत्यये प्राचीनवत्। तथा च शब्दरत्नकारोऽपि कर्मणि प्रत्यये फलविशेष्यः कर्तरि प्रत्यये पूर्ववत्। तथा हि हरिः सेव्यते एवमेवैति मनोरमायाः प्रतीकमादाय धात्वर्थ एव विशेष्य इत्यर्थः।

इयांस्तु विशेषः। तत्र फलांशो विशेष्यः कर्तरि व्यापारांश इति। दार्शनिकविदुषा नागेशेन उद्द्योते प्रतिपादितं तथा हि विग्रहे फलस्य विशेषतया इष्यते पुत्र क्यच् न भिन्नार्थत्वात् न क्यच्, किन्तु पुत्रमिच्छति इत्यर्थ एव। कर्मणि च फलविशेष्यत्वम् अत्र प्रमाणं "सुप आत्मनः क्यच्" इति सूत्रस्य भाष्यम्।[37] तथा हि अथेह क्यचा भवितव्यम्, इष्टः पुत्रः, इष्यते पुत्रः? केचित् तदाहुः न भवितव्यमिति किं कारणम्? स्वशब्देनोक्तत्वाद्। इदमेव प्रतीतमादाय पूर्वोक्तः उद्द्योतः व्याख्यातः। मञ्जूषायामपि "क्रियाप्रधानमाख्यातम्" इत्यत्र क्रियापदं करणव्युत्पत्त्या व्यापारपरं कर्मव्युत्पत्त्या फलपरमिति बोध्यम्।[38] तथा च भाव्यतेऽनेनेति भावः व्यापारः। भावयत्येनं भावः फलं सः प्रधानो मुख्यो यस्मिन्निति तद् भावप्रधानम्, भावप्रधानमाख्यातमिदं वचनम् उभयविशेष्यकशाब्दबोधपरम्। तथा चोदाहरणम्–"चैत्रः ग्रामं गच्छति" इत्यत्र चैत्राभिन्नैककर्तृको वर्तमानकालिको ग्रामाभिन्नकर्मनिष्ठः यः संयोगः तदनुकूलो व्यापारः। "चैत्रेण ग्रामो गम्यते" इत्यत्रतु चैत्रकर्तृकवर्तमानकालिकव्यापारजन्यो ग्रामाभिन्नकर्मनिष्ठ-संयोगः इति बोधः। प्राचीनमते तु उभयत्र एकमेव चैत्राभिन्नैककर्तृको वर्तमानकालिको ग्रामाभिन्नकर्मनिष्ठः यः संयोगः तदनुकूलो व्यापारः।

## उपसंहारः

प्रायः सर्वैः दार्शनिकैः यच्छाब्दबोधस्वरूपं स्वीकृतम्, तदित्थं वक्तुं शक्यते तत्त्वरूपेण पदैः वृत्त्या स्मृतानां पदार्थानां संसर्गवाक्यार्थाभिधानावगाही जायमानो

विशेष्यविशेषणभावापन्ननानापदार्थविषयकः शाब्दबोधः वाक्यार्थबोधः इत्यभिधीयते।

सः शाब्दबोधो द्विविधः 1. खण्डशाब्दबोधः 2. अखण्डशाब्दबोधश्च। आद्यः घटमानय इत्यत्र घटपदस्य घटोऽर्थः, द्वितीयायाः कर्मत्वमर्थः, आङ्पूर्वकणीञ्-धातोरानयनमर्थः, आख्यातस्य कृतिरर्थः अथवा अन्यमतेन भावना, शाब्दिकमतेन कर्ता इत्येकं खण्डशो बोधः द्वितीयो घटकर्मकानयनानुकूलकृतिमाँस्त्वमिति बोधः न्यायमते। मीमांसकमते घटकर्मकानयनानुकूला चैत्रसमवेता भावना, शाब्दिकमते चैत्रकर्तृकं घटकर्मकमानयनमिति बोधः।

❖

## सन्दर्भाः


1. स्व रूपं शब्दस्याशब्दसंज्ञा पा. सू. 1.1.68
2. अस्त्यन्यत् स्वं शब्दस्येति। किं पुनस्तत्? अर्थः। महाभाष्यम् (म.भा.1.68)
3. उणादि सू. 4.94
4. शपन्ति...... संस्कृता या। कर्णमिति (दशपाद्युणादिवृत्तिः 6.48)
5. शप्यते आहूयतेऽनेन स शब्दो नादः। (उणा.व्या.4.97)
6. अथवा प्रतीतपदार्थको..... (म.भा.पस्पशा.)
7. महाभा. 1.1.22
8. मी.द. 1.1.5 शा.भा.
9. वे.द. 1.3.28 शां.भा.
10. अष्टा. प्रत्या. सू.1.2 म.भा.
11. अष्टा. म.भा.पस्पशा.प्र.उद्द्योते
12. म.भा. पस्पशा.
13. गमेर्डोः, उणादिः 2.63
14. वा. प. 2.173
15. तर्कसंग्रहे
16. न्या.द. 2.2.13 प्रा. 2.3.8
17. सांख्यका. 3 गौड पा.
18. ब्र.सू.शा.आ. 1 पा.3
19. जैमिनी न्या. षष्ठ अधि.
20. काव्यालंकारे प्रथम 1
21. चन्द्रालोके प्र.म.
22. साहित्यदर्पणे द्वितीयपरिच्छेदः
23. योग सू.समाधि.42व्यासभाष्ये
24. अष्टा.प्रत्या.सू.1 म.भा.प्रा.
25. म.भा. पस्प.
26. पा.सू. 4.3.68
27. पर.ल.मञ्जू.
28. पा.सू. 4.3.68
29. न्यायसि.मु.शब्दखण्डः,पर.ल.मञ्जू
30. पर.ल.मञ्जूषा, न्यसि.मु.शब्द.
31. तर्कसंग्रह पदकृत्ये
32. पर.ल.मञ्जूषायां
33. वै. भू. धात्वर्थनिर्णये
34. नि. आ.1 खा.
35. वै.भू.का.
36. ल कर्मणि च भावे चा.1.2.45
37. म.भा.तृ.पा.सू.3.1.8
38. पर. लघु. मञ्जूषा.




# उपनिषद्भावनायां शब्दब्रह्मस्वरूपविचारः

**डॉ.ललिता चक्रवर्ती**

वैयाकरणाचार्यभर्तृहरेः सुप्रतिष्ठितं तत्त्वं शब्दब्रह्मतत्त्वम्। उपनिषत्साहित्येषु यस्य सूचना परिलक्ष्यते। पुरासाहित्ये तन्त्रसाहित्ये च शब्दब्रह्मवादस्योल्लेखो वर्त्तते। एतदालोचनायाः प्राक् ब्रह्मशब्दाभिधेयत्वं तथा शब्दस्वरूपनिरूपणं कर्त्तव्यम्। यतः उपनिषदि व्याकरणे च पदद्वयस्यार्थपर्यालोचना उपस्थापिता। ब्रह्मपदस्यार्थनिर्वचनप्रसङ्गे एवमेव श्रूयते-'बृंहणत्वाद् वृद्धतमत्वाच्च स आत्मा ब्रह्मेति गीयते।' बृंहणत्वाद् अर्थात् व्यापकत्वात् वृद्धतमत्वात् अर्थात् अनादितया स आत्मा ब्रह्मरूपेण गीयते। 'वृहि वृद्धौ' इति सूत्रानुसारेण 'वृंह धातुः वृद्ध्यर्थकः, तेन सह मनिन् प्रत्यययोगेन निष्पन्नब्रह्मशब्दस्यार्थो निरतिशयवृद्धिप्राप्तिरिति। अर्थात् यदपेक्षया व्यापकः न कोऽपि विद्यते। अत्र वृद्धिः निरवधिकमहत्त्वरूपार्थावबोधिका। अतः बृंहणात् ब्रह्मेति व्युत्पत्त्या देशकालादिपरिच्छेदाभावरूपं नित्यत्वं प्रतीयते। ब्रह्मसूत्रभाष्ये शङ्कराचार्येणोक्तम्-'ब्रह्मशब्दस्य हि व्युत्पद्यमानस्य नित्यशुद्धादयोऽर्थाः प्रतीयन्ते, बृहतेर्धातोरर्थानुगमादिति' (ब्रह्मसूत्र 1.1.1)। भामतीग्रन्थे वाचस्पतिमिश्रमहोदयेन व्याख्यातम्। 'वृद्धिकर्मा हि बृहतिरतिशायने वर्त्तते। तच्चेदमतिशायनम्-अनवच्छिन्नं पदान्तरावगमितं नित्य-शुद्ध-बुद्धत्वाद्यस्यानुजानातीत्यर्थः।' प्रयोगसामर्थ्यलब्धव्यापकतया शब्दब्रह्मपदेनाभिधीयते। अयं शब्दः वागिति परिगृह्यते। वाचः महिमा यथा ऋग्वेदे तथैव उपनिषत्साहित्येऽपि परिकीर्त्तितः। वाचः अनादित्वं वैदिकसाहित्येषु स्पष्टमभिधीयते।

ऋग्वेदे अम्भृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन तादात्म्यमनुभवन्ती स्वात्मानं स्तौति.....'अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः' (ऋग्वेद 10.125.1) इति मन्त्रे। जगतः ईश्वरी सा धनानां प्रापयित्री, यज्ञार्हाणां मुख्या। द्यावापृथिव्यां व्याप्यरूपा सा। दिव्यशक्तेः प्रेरणा हि वैदिकऋषिणा

वागित्यभिधीयते, यस्या औज्जल्येन जगदालोकितं जातम्। 'ब्रह्म वाचा सह अविनाभूतम्'–यावद् ब्रह्म विष्ठितं तावती वाक्–(ऋग्वेद 10.114.8)। जैमिनीयब्राह्मणे शतपथब्राह्मणे च वाङ्माहात्म्यं प्रतिष्ठितम्, उपनिषत्सु शब्दस्य ब्रह्मत्वमसकृत् प्रतिपादितम्। ओङ्कारस्य ब्रह्मरूपेणोपस्थानं हि शब्दब्रह्मवादं सूचयति। ओङ्कारो हि ब्रह्म (ऋग्वेदः 1.164.41) ओमिति ब्रह्म, ओमितीदं सर्वम्–(तैत्तिरीयोपनिषद् 1.8) ओङ्कारो हि परापरब्रह्मस्वरूपः। सर्वोपासनाङ्गभूतं हि ओङ्कारोपासनम्। सत्यस्वरूपम् अक्षरं पुरुषाख्यं परब्रह्म, प्राणाख्यं प्रथमजातं तु अपरब्रह्म, ओङ्कारस्तु उभयस्य प्रतीकरूपः। ओङ्कारसहायः मुमुक्षुः एकतरं परमपरं वा ब्रह्मानुगच्छति। ब्रह्मणः नेदिष्ठाश्रयः हि ओङ्कारः। अ–उ–म् इत्यक्षरात्मकः ओङ्कारस्तु सृष्टौ अभिव्यक्तब्रह्मणः भावत्रयाणां ज्ञापकः–माण्डूक्योपनिषद् (8,9)। आत्मनो ये पादाः ते ओङ्कारस्य मात्राः। कास्ता इति प्रश्ने उदिते उच्यते अकार उकारो मकारश्चेति। ओङ्कारस्य प्रथमा मात्रा अकारः ब्रह्मणः जाग्रतस्थानभूता वैश्वानररूपः, द्वितीया मात्रा स्वप्नस्थानतैजसः यतः अकारादुत्कृष्ट एव उकारः, तृतीया मात्रा तु सुषुप्तिस्थानः प्राज्ञ एव। किन्तु अमात्र ओङ्कारस्तु आत्मनः चतुर्थपादः यः विषयप्रपञ्चातीतः मङ्गलमयः अद्वैतरूप आत्मस्वरूपः। एवं यथोक्तं आत्मस्वरूपं येन ज्ञायते स परमात्मानं संविशति, अकारो यथा सर्वाक्षरान् व्याप्य विराजते तथा वैश्वानरोऽपि। सुषुप्तौ अधिष्ठाता प्राज्ञस्तु ओङ्कारस्य तृतीयमात्रामकाररूपः यः विश्वतैजसात्मनः परिमापकः विलयस्थानं वा। ओङ्कारोच्चारणकाले अकार उकारश्च मकारे प्रविशतः, लयं गच्छतः च। सुषुप्तौ वैश्वानरः तैजसश्च प्राज्ञैकभूतौ जातौ, ओङ्कारस्योच्चारणेन अकार उकारश्च मकारेण सह एकीभूतौ सन्तौ लयं गच्छतः।

उक्तञ्च–

**अकारं पुरुषं विश्वमुकारे प्रविलापयेत्।**
**अकारं तैजसं ज्ञेयं मकारे प्रविलापयेत्।।**
**मकारं कारणं प्राज्ञं चिदात्मनि प्रविलापयेत्।**
**एवं समाहितो योगी पश्येदात्मानमद्वयम्।।**

मैत्र्युपनिषदि (6.22) द्वे एव ब्रह्माणी व्याख्यायिते–शब्दश्चैकं अशब्दश्च द्वितीयं, शब्देन ब्रह्मणा अशब्दब्रह्म प्रकटीक्रियते। ओङ्कारो हि शब्दाख्यं ब्रह्म, ओङ्कारसहायः



मुमुक्षुः परब्रह्मणि लयमेति। यथा–ऊर्णनाभिः लूतातन्तुना ऊर्ध्वाकाशे निरङ्कुश-विहारस्थानं प्राप्नोति तद्वत् साधकः ओङ्कारसाहाय्येन कैवल्याख्यं स्वातन्त्र्यं लभते। शब्दब्रह्मवादिनां मते श्रवणेन्द्रिययोरङ्गुष्ठयोजनामनु अन्तर्हृदये आकाशे वा यः शब्दः श्रूयते स शब्दब्रह्मेति। नदीनां घोषः, घण्टाघोषः, रथध्वनिः, मण्डूकरवः, वर्षणशब्दः, निवाते गुहायां स्थितः शब्दः इत्यादयः शब्दाः, तैः सदृशः यो अन्तराकाशशब्दस्सः शब्दब्रह्म इत्यभिधीयते। शब्दब्रह्मणि निष्णातः हि परब्रह्म अधिगन्तुं क्षम एव। यथा पृथक् स्वभावकुसुमरसा मध्वात्मत्वं लब्ध्वा स्वस्य पृथक्त्वं विजहति तद्वत् अशब्देऽव्यक्ते ब्रह्मणि लयं प्राप्नोति। उक्तञ्च–

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।।**

प्रणवाख्यशब्दब्रह्माभ्यासो हि अशब्दापरब्रह्माधिगमस्य साधनमेव। ओमिति-शब्दोच्चारणेन ऊर्ध्वमुत्क्रान्तः अशब्दब्रह्मणि परब्रह्मणि वा लयं प्राप्नोति।

शब्दब्रह्मवादस्वीकारमूले या युक्तयः विद्यन्ते तेषु अन्यतमा शब्दस्य ब्रह्मसदृशं महत्त्वं व्यापकत्वच्च। उपनिषत्सु ब्रह्मणः सर्वव्यापकत्वं महत्त्वं यथा विधृतं तथैव शब्दानां व्यापकता महनीयता च प्रतिष्ठिता। तैत्तिरीयोपनिषदि उच्यते–'यतो वा इमानि भूतानि जायन्ते (3.1.54)' अर्थात् यस्मात् आस्तम्बब्रह्मपर्यन्तानि भूतानि जायन्ते, येन प्राणान् धारयन्ति विनाशकाले च येन सह तादात्म्यमेव लभन्ते तद् ब्रह्मेति। एवं सृष्ट्या विद्यमानत्वे सति शब्दः सर्वविधव्यवहाराणां प्रयोजको भवति।

बृहदारण्यके उच्यते 'वाग् वै सम्राट्, परमं ब्रह्म' (4.1.2) वाग् एव आयतनं शरीरं वा, वागेव प्रज्ञा, ऋग्वेदादिसर्वविधानि शास्त्राणि वाचा वै प्रज्ञायन्ते। तस्या एतादृशी व्यापकता तस्यै ब्रह्मपदवीं प्रयच्छति। अत्र जनकयाज्ञवल्क्यसंवादेऽपि दृश्यते यत् आचार्यशैलिनि जनकसमीपं शब्दब्रह्मविषयोपदेशदानकाले सर्वविधव्यवहारस्य मूलतया, प्रज्ञारूपिणी वाचं परब्रह्मरूपेणाभिधीयते, अस्यान्तर्निहितार्थमवबोद्धुकामो जनको याज्ञवल्क्यसमीपं गतः याज्ञवल्क्य आह–......वागेवास्य ज्योतिर्भवतीति वाचैवायं ज्योतिषास्ते..... इति (बृहदारण्यकोपनिषत् 4.3.5)। यस्मिन् काले सर्वज्योतिः अस्तमेति, बाह्यज्योतिषोभावात् सर्वचेष्टा निरुद्धा जाता तदा वागुच्चरति, तेन वाचा ज्योतिषा सर्वाणि कर्माणि क्रियन्ते। श्रोत्रमनसोर्नैरन्तर्यं सम्भवतीति। विद्युतस्य

विद्योतनं, वायोः प्रवहणं, मेघवर्षणं सर्वमेव शब्दानुविद्धम्-बृहदारण्यकोपनिषत् (1.1.1) वाचः एतादृशी सर्वव्यापिनी सत्ता हि तस्या बृंहणशीलता, यया सा ब्रह्मपदवीमारोढुं शक्नोति।

शब्दस्य व्यापकत्वादेव ब्रह्मरूपेण स व्यपदिश्यते। छान्दोग्योपनिषदि ऋषिणा प्रोक्तं यत् प्राणिनां धर्माधर्मं सत्यासत्यं साध्वसाधु प्रीत्यप्रीतिकरमिति विषयाः सर्वे एव वाचा विज्ञापिताः सन्ति। अतः ब्रह्मरूपेण उपासितायां सत्यां वाक् मुमुक्षुभ्यः प्रार्थितं ददाति (छान्दोग्योपनिषद् 7.2.1)। सृष्टेः मूलभूता वाक् व्यक्ताव्यक्तरूपा द्विविधा। उपनिषत्सु ब्रह्मणः स्वरूपव्याख्याकाले उक्तञ्च-यतः वस्तुतत्त्वमुत्पद्यते उत्पत्तिमात्रमेव यमाश्रयते अन्तिमे च यस्मिन् विलीयते तद् ब्रह्म। एवं वाक् सृष्टेश्च मूले विद्यमाना अपि सर्वविधव्यवहारस्य प्रयोजिका एव।

वाचः महनीयता तां ब्रह्मपदव्याम् अभिषिञ्चति, उपनिषत्सु ब्रह्म सच्चिदानन्दरूपं, सत् नित्यं, चित् ज्ञानम्, शब्दस्य नित्यता ज्ञानरूपता च तत्र व्याख्याता। 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुत्यनुसारेण ब्रह्म ज्ञानस्वरूपं, वागेव ज्ञानाधिष्ठातृतया ज्ञेयविषयस्य वाचकरूपतया, ज्ञानोत्पत्तेः कारणतया च ब्रह्मसदृशी वाक् ब्रह्मोपमैव उपास्या। पङ्ग्वन्धवत् ज्ञानकर्मणोः अन्योन्यनिर्भरशीलता जागतिकाव्याहतगतिमयतायाः प्रेरणारूपा।

'जन्माद्यस्य यतः' (1.1.2) इति ब्रह्मसूत्रव्याख्यावसरे ब्रह्म विश्वप्रपञ्च-स्योत्पत्तिस्थितिलयकारणरूपेण व्याख्यातम्। सदृशयुक्त्या शब्दोऽपि ब्रह्मपदवाच्यम्, यतः वाचकशब्देनैव पदार्था ज्ञेयत्वमधिगच्छन्ति। संज्ञाहीनः पदार्थो नास्त्येव। अतः उत्पत्तेरिव स्थितेरपि कारणतया शब्दो ब्रह्मसदृशः। वस्तुध्वंसे तु 'ध्वंस' इति वाचकशब्देनैव ध्वंसज्ञानं जायते।

छान्दोग्यपनिषदि उक्तं-'अस्य लोकस्य का गतिरित्याकाशः (1.9.1)।' आकाशः सर्वभूतानाम् आश्रयरूपः, कालत्रयेषु एव तस्य परमा प्रतिष्ठा। अतः आकाशपदं परमात्मवाचकम्, यतः सर्वाणि भूतानि आकाशादेव समुत्पद्यन्ते, प्रलयकाले तस्मिन् अस्तं यान्ति। वेदान्तसूत्रेऽपि अभिधीयते 'आकाशस्तल्लिङ्गात्।' (1.1.22) छान्दोग्योपनिषदि खं ब्रह्म (4.10.4) इत्याकारा श्रुतिः दृश्यते। साधकस्य चिदाकाशं व्याप्य अवस्थितो विद्यानन्द एव ब्रह्मस्वरूपम्। श्रीमद्भगवद्गीतायां उक्तं-शब्दं खे



अर्थात् श्रेष्ठेषु आकाशः शब्दाश्रयरूपः। शब्दस्तु आकाशस्य गुणभूतः आकाशस्य ब्रह्मरूपता तदाश्रितेभ्यः शब्देभ्यो महनीयतां प्रयच्छति ब्रह्माभिधेयञ्च करोति।

किन्त्वत्र आपत्तिर्जायते शब्दब्रह्मणः स्वरूपगतभिन्नत्वं सुस्पष्टम्, अतः ब्रह्माभिन्नतया शब्दस्वरूपव्याख्यानमनुचितम्। उपनिषत्सु दार्शनिकग्रन्थेषु च ब्रह्मस्वरूपं येन रूपेण प्रतिपाद्यते तेन शब्दस्तु न ब्रह्माभिधेयः। प्रथमतः मुण्डकोपनिषदि अनयोः भिन्नता प्रतिपादिता अस्मिन् मन्त्रे..... प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते (2.2.4)। ब्रह्मप्राप्तेरुपायभूतो हि प्रणवः। प्रणवजपेन आत्मा उपलब्धेर्विषयताम् आप्नोति। 'तस्य वाचकः प्रणवः' (1.27) इति पातञ्जलसूत्रेऽपि व्याख्यातं यत् ब्रह्म हि वाच्यं प्रणवस्तु वाचकः, न तयोरभिन्नत्वम्। दार्शनिकग्रन्थेषु ब्रह्म जगत् कारणरूपेण वर्ण्यते, उपादानकारणतया निमित्तकारणतया तत् अनित्यकार्यरूपजगतः कर्त्तृस्वरूपम्। किन्तु शब्दस्यैतादृशं कारणत्वन्तु विचार्य्यविषयः। यद्यपि वैयाकरणाचार्यभर्तृहरिणा विश्वसृष्टेः शक्तिः शब्दाश्रितरूपेण उपस्थाप्यते किन्तु सा न शब्दमात्राश्रिता अपशब्दाश्रयत्वासम्भवात्।

यदिच्छन्तः साधकाः ब्रह्मचर्य्यं गुरुकुलवासलक्षणं ब्रह्मप्राप्त्यनुकूलञ्चाचरन्ति तद्धि ओम् इति पदम्। 'ओम्- शब्दस्तु ब्रह्मप्रतीकस्वरूपः। एतत् ओङ्काररूपमक्षरम् अपरं ब्रह्म परब्रह्म चेति, परब्रह्मप्राप्तिसाधनानां मध्ये श्रेष्ठं हि ओङ्कारालम्बनम्। अर्थात् ओङ्कारो यथा ब्रह्मणः वाचकः तथा हि ब्रह्मणः प्रतीकरूपः। वाच्येन सह वाचकस्य न सर्वथाभिन्नत्वं किन्तु प्रतीकतया तस्याभिन्नत्वमुपस्थापितम्। पुनः ऋग्वेदादयः अस्य निःश्वासरूपा अप्रयत्नसाध्याः, अनेन शब्दब्रह्मणो भिन्नत्वमुपन्यस्तम्। शब्दो यथा श्रवणोन्द्रियग्राह्यः तद् ब्रह्म न तथा श्रोत्रेण प्राप्तियोग्यः। तत्तु 'अशब्दमस्पर्शम्... (कठोपनिषद् 1.3.15)' इति श्रुतिद्वारा शब्दैः सह तस्य पार्थक्यं स्वरूपेण सूचितम्।

अर्थात् उपनिषत्सु यथा शब्दब्रह्मणोरैकात्म्यं प्रतिपादितं तद्वत् तयोर्भिन्न-त्वमप्युपस्थापितम्। अत्र स्वविरोधशङ्कोदेति इति तन्निराकरणाय एवमेव वक्तुं शक्यते यत् सृष्टेः आदौ जातं स्पन्दनं हि ओङ्कार इत्यभिधीयते आचार्यैः। आदिस्पन्दनेभ्यः जगदुत्पत्तिः अतः तद्धि ब्रह्मपदवाच्यम्। अत्र ब्रह्मशब्दो गौणार्थे प्रयुक्तः ब्रह्मणः महनीयत्वं व्यापकत्वं शब्दे कल्पितम्। अतः विविधेषु शास्त्रेषु शब्दो ज्योतिरूपा

वागित्यभिधीयते, यस्याभावे जगत् तमसाच्छन्नं जातं, आत्मचैतन्यज्ञानाभावे यथा मुमुक्षुः अन्धं तमः प्रविशति। एवं शब्दब्रह्मणोरैक्यस्थापनं न तु पारमार्थिकम् अपि तु व्यावहारिकमेव। व्यकरणशास्त्रे न तु स्थूलशब्दः अपि तु सूक्ष्मशब्द एव ब्रह्मपदाभिधेयः। वैयाकरणप्रवरेण भर्तृहरिणोक्तम्–

'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्'–वाक्यपदीयम् (1.1)। अत्र शब्दतत्त्वम् इति पदव्यवहारेण केवलं परानामा सूक्ष्मतमशब्दो हि नित्यब्रह्मसदृशरूपेण समुपदिष्टाः न तु शब्दमात्रयेव।

प्राणिनां देहस्थितः स्फुटः सूक्ष्मशब्दस्तथा महाकाशे विराजमानः स्पन्दनात्मकः सूक्ष्मशब्दो हि 'नाद' इति संज्ञया अभिहितः। नादस्तु प्रणवपदवाच्य ओङ्कारो वा। स्पन्दनेभ्यः व्यक्ताऽव्यक्त–शब्दाश्च उत्पद्यन्ते तेषु अव्यक्तः सूक्ष्मः च शब्दो नादब्रह्मवाच्यः नादात्मकसूक्ष्मशब्दो हि सृष्टेः कारणरूपब्रह्मपदरूपेण परिचीयन्ते। सृष्टेः मूलभूतमाकाशं शून्यं वा। तत्र निहितशक्त्या स्पन्दनं जायते, तद्धि सूक्ष्मवाग्रूपम्। अन्तःसमाहितशून्यता हि शब्दाकारेण व्यक्ता जाता। चेतनायाः क्रमव्याप्तिः हि ब्रह्मभावना, अविनाभावसम्बन्धतया वाक् तस्याः बहिर्मुखप्रकाशरूपा।

❖



# रतिमन्मथनाटके मन्मथः

**डॉ. श्रीप्रकाश रायः**

नाट्येषु पात्राणां चरित्रचित्रणस्यातीवगौरवाधायकं पदमामनन्ति सुधियः। पुराणादिप्रथितं कथावस्तु समादाय कवयस्तत्र तत्र रसानुरूपं स्वेच्छानुरूपं परिवर्तनं परिवर्धनञ्च विदधानाः नाट्यवस्तु ग्रथ्नन्ति। अस्मिन् समये पात्राणां चरित्रेऽपि परिवर्तनं परिवर्द्धनं च सञ्जायते। कवेः स्वेच्छानुरूपं नाट्येषु चित्रितानि पात्राणि तत्तद्वाङ्मयेषु अमराणि भवन्ति। महाकविना कालिदासेनाभिज्ञानशाकुन्तलनाम्नि नाटके महाभारतकथायाः दुष्यन्तः शकुन्तला च तथा चित्रिते यथा ते संस्कृतवाङ्मयेऽमृतेऽभूताम्। अन्यथा भारतीयकथायाः नायको लम्पटो दुष्यन्तः स्वार्थपरायणोऽतीवकुशला नायिका शकुन्तला चोभे कथं धीरोदत्तत्वमुग्धात्वयोः भाजने स्याताम्। तदेत्तसर्वं महाकवेः कालिदासस्य पात्रचरित्रचित्रणविषयकस्य नैपुण्यस्यैव माहात्म्यमिति बोध्यम्।

रतिमन्मथनाटके जगन्नाथपण्डितेन पुराणादिप्रथितापि रतिमन्मथयोः कथा परिवर्त्य प्रस्तुतीकृता यद्वशात् पात्राणां चरित्रमपि प्रचुरं प्रदीपितमिवास्ति। दिव्यादिव्यान्युत्तमः मध्यमाधमपात्राणि चित्रितान्यत्र। तेषां चरित्रस्य स्वकीयं वैशिष्ट्यं विद्यते। यदाविष्कर्त्तुं जगन्नाथपण्डितः सर्वथा समर्थोऽस्ति। इह नायकस्य मन्मथस्य चरित्रचित्रणं विधीयते।

दशरूपककृता नायकस्य (प्रधाननायकस्य) कतिपयाः गुणाः प्रोक्ताः–

**नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।**
**रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा।।**
**बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः।**
**शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः।।** (दशरूपकम् 2.1-2)

एषु कतिपयानां गुणानां विशेषतया स्थितिर्धीरोदात्तनायके भवति। तदुक्तं तेनैव-

**महासत्त्वोऽतिगम्भीरो क्षमावानविकत्थनः।**
**स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः।।** (दशरूपकम् 2.4-5)

एवंविधः धीरोदात्तः नायकः नाटकेष्वभिमतोऽस्ति। रतिमन्मथनाटकं रूपकेषु नाटकं, तस्य नायकः मन्मथः धीरोदात्तनायकः। इदानीं नायकस्य सामान्यगुणा अथवा

धीरोदात्तस्य विशेषगुणाः ये भवन्ति तानक्षिलक्ष्यीकृत्य रतिमन्मथे मन्मथस्य चरित्रे कश्चित् प्रकाशः प्रतन्यते।

मन्मथः रूढवंशोऽस्ति। असौ त्रैलोक्याधिपतेः भगवतः विष्णोरौरसस्तनयः। स्वयं लक्ष्मीरस्य जननी। चतुर्मुखकमलासनोऽस्याग्रजः। त्रिदिवौकसामधिपतिरिन्द्रोऽस्य पितृव्योऽस्ति। शर्वाणी पितृष्वसा भवति। समुद्रो मातामहः मातुलश्चन्द्र इति विशालमस्य कुलम्। मन्मथस्यैवंविधं प्रथितं कुलं प्रशंसयन्ती सारिका रत्यर्थं श्रेष्ठवरो मन्मथ इति निर्धारयति। नहि वरेषु गुणानामेवंविधं प्राचुर्यमुपलभ्यत इति तस्याः विनिश्चयः। तद्यथा–

**देवः शाङ्र्गधरः पितास्य जननी सा लोकमाताग्रजो-**
**भ्राताप्यम्बुजसम्भवो दिविषदां नेता पितृव्यः पुनः।**
**शर्वाण्येव पितृष्वसां जलनिधिर्मातामहो मातुल–**
**श्चन्द्रो हन्त वरः स्वयं तु मदनः क्वेदृग्गुणा श्रीर्भवेत्।।**(रतिमन्मथम् 2.4)

मन्मथः आकृत्या मधुरोऽस्ति। अभिनवयौवनसमारुढमस्य लोकोत्तरं सौन्दर्यं त्रिभुवनमोहनसमर्थं विद्यते। अद्यावध्यनिर्वृत्तविवाहमङ्गल एव कन्यकाजनानामभिलषणीयो भवति। यथेच्छया स्वर्गलोकं विचरन्तं तुरगारूढमेनमवलोक्य स्वरूपसम्पदा निर्जितनिखिलाङ्गनापि रतिरतितरामेतस्य वशिनी भवति। सकृदेवैतं जनं दृष्ट्वा कथमहं कुलकन्यकाजनप्रतिकूलेनानुरागेण हतहृदया सञ्जातास्मीति स्वयमात्मनो पूर्वरागमभिव्यनक्ति। सा सकृद्दृष्टमप्येतं जनं चिरपरिचितमिव जानती एतस्मिन् सानुरागा भवति। पितृभ्यां परतन्त्रापि परोक्षप्रेमापि च सा भूयः मन्मथदर्शनार्थमधिकं उत्ताम्यति।

रतिः (स्वगतम्) अहो पूर्वस्मिन् दिवसेऽभूतपूर्वं कुतो मम समुत्पन्नं सौधाधिरोहणकौतूहलम्। समुत्पन्ने वा तस्मिन् नगरवीथ्यां तुरगं नर्तयतस्तस्य सुभगस्य कुतो नु निर्वृत्तं यदृच्छादर्शनम्। दृष्टे च सकलनागरलोकसाधारणे तस्मिन् कुतः कुलकन्यकाजनशीलप्रतिकूलो मम सुचिरपरिचित इव एकपदे जनित ईदृशोऽनुरागो येन खलु साम्प्रतम्–

**पितृभ्यां परतन्त्राया परोक्षप्रेमापि तन्निशमयितुम्।**
**उत्ताम्यति किमिव मे उज्झितधीरत्वं हृदयम्।।** (रति.पृ. 13-14)

किं बहुना, रत्याः सख्यावपि कोकिलवाणीकीरवाण्यौ मन्मथस्य लोकाभिरामं रूपं सकललोकानन्दनगुणगणमधुरं समर्थयतः। "अन्या–हला रते! सकललोकानन्दन-गुणगणमधुरस्य पुरवीथीदृष्टचरस्य तस्य महाभागस्येति भणितव्ये किं रसालापदेशेन?



(रति.पृ.14)।" किञ्च किन्नामधेयो भवानिति ताभ्यां दृष्टेन मन्मथेन आत्मनः परिचये प्रदत्ते तावश्चर्यमावहतः। एष सौन्दर्यस्य सीमेति समर्थयतश्च। "सख्यौ-(सविस्मयं जनान्तिकम्)– कथं सैषः? यः किल श्रूयते भगवतो लक्ष्मीवल्लभस्य तनयः सीमासौन्दर्यस्य......। (रति.पृ.21)।" अनुरूपरूपसम्पदोस्तयोः समागमो युक्त इति अनयोः विनिश्चयः तथा चान्यत्राभिहितम्–विधेरपि स्वारसिकः प्रयासः परस्परं योग्यसमागमाय।

सख्यौ–(रतिमन्मथञ्च निरूपयन्त्यौ) अयि, अन्योन्यानुरूपसम्पदोरेतयोर्द्वयोरपि समागमो भवेत् तच्चरितार्थं विधेर्निर्माणकौशलम्। (रति. पृ.22)।" युवावस्थायां गतः मन्मथोऽतीव रसिकस्वभावोऽस्ति। यद्यप्येष स्वयमेव भुवनमोहनशीलः तथापि अपूर्वसुन्दरीं रतिमवलोक्य हतहृदयोऽनिशं तत्सङ्गमं कामयते। द्वितीयेऽङ्के विदूषकेण-"वयस्य, अनतिक्रान्तमुग्धभावायास्तस्या उत्तानैरपि विभ्रमैः कथमेतावत्पर्युत्सुकोऽसि" इत्युक्तः रसिकशिरोमणिरेष वक्ति–

**लीढालीढरदच्छदं नवभवद्वक्षोजकोशार्पित–**
**व्यक्ताव्यक्तनखक्षतं प्रतिकलोदञ्चन्निषेधक्रियम्।**
**मुक्तामुक्तवलग्ननीविनहनं साध्यं मृदूपायतो**
**लज्जाकुड्मलतेक्षणं च कृतिना लभ्येत मुग्धारतम्।।** (रति.2.18)

मन्मथः वर्णेन श्यामवर्णोऽस्ति मुखेन चन्द्रतुल्यः कन्दोट्टश्यामलाङ्गश्चायं रत्याः लोचनं मनश्चानन्दयति।

**कन्दोट्टश्यामलाङ्गश्चन्द्रोपमितेन वदनलावण्येन।**
**नन्दयति लोचनं मम नन्दयत्ययं मनसश्च प्रमोहम्।।** (रति.2.6)

मन्मथः विष्णोरौरसपुत्रत्वेनात्र वर्णितोऽस्ति। विष्णुः वर्णेन नीलः गगनसदृश इति प्रसिद्धिः। अत एव. पुराणेषु सर्वत्र विष्णोरंशादवतीर्णाः नीलवर्णा एव। अत एव भवभूतिना लवकुशयोः वपुषः कपोतपारावतमेचकत्वमुत्तररामचरितेऽभ्युपगतम्। कपोतपारावतमेचकं वपुः.....। (उत्तरराम. 6.25)। प्रद्युम्नानिरुद्धादीनां वपुषो नीलवर्णता तत्र तत्रोपलभ्यते। मन्मथस्तु प्रद्युम्न एवेत्यलमप्रकृतेन।

मन्मथः सामन्तशासक इव रतिमन्मथे चित्रितोऽस्ति। अस्यामात्योऽप्यास्ति, नर्मसचिवोऽपि, सभापि, सभासदोऽपि सैन्यमपि च तथाप्येष देवेन्द्रस्यानुचरोऽस्ति। वसन्तेन सह मन्त्रयतोऽस्योक्त्या देवेन्द्रानुचरत्वं स्पष्टीभवति। तद्यथा–

**उक्तमनुक्तं वा ननु साध्यमसाध्यमीश्वरस्य कृते।**
**अर्हं वा यदि वाऽनर्हं कार्यं कार्यं हितेन भृत्येन।।** (रति. 3.16)

भारतीयवाङ्मये मन्मथः स्त्रीपुंसयोः रहः संयोगकारकः शृङ्गाराधिदेवतारूपेण प्रसिद्धोऽस्ति। अत एवास्य वसन्तः सखा, चन्द्रचन्द्रिकामलयानिलभ्रमरालीशुकपिकादयः सहायाश्च तत्र-तत्र वर्णिताः समुपलभ्यन्ते। रतिमन्मथनाटकेऽपि अस्यैत एव सहायाः भवन्ति। वसन्तोऽस्यामात्योऽस्ति। असौ ह्यस्य सदैव हितचिन्तापरोऽस्ति। चन्द्र-चन्द्रिकाप्रभृतयस्त्वस्य सैन्यभूताः प्रोक्ताः। एतानेवादायायं भगवतः शूलपाणेः विजयार्थं युद्धे तिष्ठति। यद्यपि तृतीयेऽङ्केऽस्य सेनायाः सविस्तरं वर्णनं कविना प्रस्तुतीकृतं तथापि द्वितीयेऽङ्के रत्याः विरहादत्यर्थं सन्तपतोऽस्योक्त्यास्य उपकरणानां सम्यक् सूचनोपलभ्यते। तद्यथा–

**वसन्तः शीतांशुर्मलयपवमानः परभृताः**
**शुका भृङ्गामाल्यं मधुमलयजं पङ्कजसरः।**
**कलं गीतं लास्यं प्रमदवनमन्यच्च सकलं**
**प्रतीपं मे जातं ननु वत ममैवोपकरणम्।।** (रति. 2.19)

तदेवं शृङ्गाराधिदेवतानुरूपा एवास्य सहायाः। परन्तु रतिमन्मथे मन्मथस्य वीररूपमप्युपलभ्यते। दिव्यास्त्राण्यप्येष बिभर्ति, दुस्तरशाम्बरीकं मायाजालमपि न जानाति। चतुर्थेऽङ्के नारंदशिष्ययोः संवादद्वारा मन्मथशम्बयोर्घोरयुद्धस्य यद्वर्णनं प्रस्तुतीकृतं तत्राग्नेयास्त्र–वायव्यास्त्र–वारुणास्त्र–पार्वतास्त्रादीनामन्योन्यं प्रयोगमेतौ कुरुतः। अनन्तरञ्च मायाविष्करणे एषोऽपि स्वमायया तस्याभिमुख्यं करोत्येव।

मन्मथः पुष्पधन्वा पुष्पचाप इति च प्रसिद्धिरस्ति। रतिमन्मथे तु घुटिकां धनुश्च धत्ते। करयोस्तु स्वकरलालितं शुकमाकलयति। विदूषकेण नन्दनोद्याने तव रत्या साक्षात्कारः सम्भाव्यत इति श्रुत्वा सहर्षं सोत्साहञ्च स्वकरलालितशुकं घुटिकां धनुश्चादाय नन्दनाभिमुखो भवति। "मन्मथः–(सौत्सुक्यम्) सखे! समुत्पदित-कुतूहलोऽस्म्येवंवादिना भवता नन्दनोद्यानगमनाय (इति करलालितशुको घुटिका धनुरादायोत्तिष्ठन् विदूषकं प्रति) सखे गच्छाग्रतः।" (रति. पृ.10)। अनयैव घुटिकया सः करलालितशुकस्य सौहित्यार्थमवतारिताम्रफलानयनार्थं गतोऽकस्मादेव शशधरमुखीं हृदयवल्लभां पश्यति। धनुरिदं पुष्पमयं घुटिका च पुष्पमयीति यद्यपि नात्र स्पष्टीभवति परन्तु मन्मथस्य पुष्पमयधनुःशरत्वमन्यत्र तृतीयेऽङ्के वाचस्पतेर्वचसावगम्यत एव। यत्रेन्द्रवरुणयमकुबेरादीनां दम्भोल्यादयः नैव समर्थास्तत्र मन्मथस्यैक एव पुष्पशरः प्रभवति यद्वशात्सुखं शेते विडौजाः। तद्यथा वाचस्पतिः–

**चक्रं तत्क्रमते न यत्र घटते दम्भो न दम्भोलिगः**
**पाशो नेङ्गति पाशिनः पितृपतेर्दण्डो न चोद्दण्डति।**



**दुस्साधे ननु यत्र कर्मणि भवन्मुक्तैः प्रसूनैः शरै–**
**रेकद्वैरपि शान्तशात्रवमदो वृत्रारिरानन्दति।।** (रति. 3.22)।

अत्रेदमवधेयम्–पुराणेषु मन्मथस्य जन्मद्वयस्य कथोपलभ्यते। पूर्वमसौ विष्णोर्मानसः पुत्रः रतिपतिरस्ति। देवकार्यार्थं देवाधिदेवं शिवमुमया संयोजयितुं तत्कोपभाजनतामवाप्य भस्मत्वं गतः परन्तु रत्याः प्रार्थनया प्रसन्नस्येश्वरस्य प्रसादात् त्रेतायां विष्णोरंशादवतीर्णस्य श्रीकृष्णस्य तनयो भूत्वा प्रद्युम्नरूपेण पुनरुज्जीवितो भवति। जगन्नाथपण्डितस्तु कथामेवान्यथाकृत्य द्वयोर्जन्मनोरेकस्मिन्नेव समन्वयं करोति येनास्य नाट्य-कौशलमभिव्यज्यते। अत एव रतिमन्मथे मन्मथस्य शृङ्गाराधिदैवतरूपता शूररूपता चोभयमुपलभ्यते। दृष्ट्यानया महासत्त्वोऽप्येष इति वक्तुं शक्यते।

मन्मथोऽतीव विनीतोऽस्ति। देवाधिदेवस्य शिवस्य विजयप्रयाणामन्त्रणार्थं देवराजेन सादरं सबहुमानेन चाहूतस्तस्य सभायांससचिव एष याति। तत्र विनयातिशयं प्रकटयन् स्वस्मरणकारणं पृच्छन्नेष वक्ति–

"मन्मथः–(महेन्द्रदृग्वलननिर्दिष्ट आसने समुपविश्य वाचस्पतिं प्रति) भगवन्। भ्रूकिङ्करीभूतभूर्भुवः स्वस्तित्रयप्रवीरस्य निरन्तरोर्जस्वलनिजतेजोऽनल्पशलभायित-ससंरम्भजम्भनमुचि विरोचनपुलोमबलवृत्रादिशात्रवनिकरस्यापि तातस्य कुलिशायुधस्य किमर्थमयं स्मृतिकर्मीभूतो नियोज्यकोटिचरमकोटिनिविष्टो जनः।" इति।(रति. पृ.66)।

अनन्तरं तु वाचस्पतिना सबाहुमानमस्य प्रशंसायाः कृते आत्मप्रशंसां श्रोतुमिच्छन्निव सविनयं वदति।

मन्मथः–(सव्रीडमिव) भगवन् प्रभवन्ति हि प्रभवो भृत्यबहूपकरणे।
किन्तु–**पुरस्कृत्यात्मसमानसन्निधौ निजोपजीव्येन विधेयगौरवात्।**
**भवेदसंसाधितवस्तुनो न किं धियेऽर्थवादोऽपि कुलप्रभाजुषः।।**(रति.3।23)
एवमन्यत्रापि विनयातिशयमेतस्य परिलक्ष्यते।

मन्मथः धार्मिकस्वभावोऽस्ति। गुरुषु देवतासु कृत्याकृत्येषु चास्य विश्वासोऽस्ति। सः प्रत्यहं सविधि सन्ध्यावन्दनादि कृत्यं सम्पादयति। प्रथमाङ्कस्यान्त एवास्य धार्मिकबुद्धिर्विज्ञायते। रत्यामतितरामनुरक्तमानसोऽपि नन्दनकानने सविशेषदर्शनोद्दीपिता-नुरागवेदनां विनोदयितुमिच्छुरपि चैष भगवति गभस्तिमालिनि गगनमध्यमारूढे मध्यन्दिनं कृत्यं नैव विस्मारयति। किञ्च नन्दनकाननस्य पार्श्वतः निष्यन्दमानां मन्दाकिनीं सकलदुर्वारतापनिर्वापयित्रीं जानन् तदवगाहनानन्तरं मध्यन्दिनं विधिं निर्वापयितुमिच्छति। तद्यथा–

"मन्मथः–(आकर्ण्य) साधूक्तं वैतालिकेन..........तदहमपि प्रियतमाविश्लेष-

दवथुनिचुलितान्तरो दुर्वारसर्वतापनिर्वापयित्रीमस्य नन्दनोद्यानस्य पार्श्वतः निष्यन्दमानां मन्दाकिनीमवगाह्य माध्यन्दिनं विधिं निर्वर्तयिष्यामि।" (रतिमन्मथम् पृ.24-25)

विनीतोऽपि मन्मथः शूरतयातीवोत्साहवत्तया च निगूढाहङ्कारोऽप्यस्ति। इन्द्रसभायामिन्द्रेण "वत्स! अनितरसाध्यतया त्वमेव सकललोकशिवङ्करे कर्मणि समुत्सृष्टवात्सल्यं नियोक्तव्योऽसि।" (रति.पृ.66)। इत्युक्त एतादृशे कर्मणि प्रवृत्तौ मृत्युभयमवगच्छन्नपि सोत्साहं पृच्छति-

**कं वाते परिपन्थनं युधि शरैर्दर्पोद्धुरं शायये**
**कस्याद्य क्रियतां चिराय विषयव्यासक्तमन्तर्मुनेः।**
**आकीटात् पुनरासरोरुहभवात्को वा शरव्यं न मे**
**ताताज्ञापय मा चिरं किमधुना कुर्यामहं त्वत्प्रियम्।।** (रति. 3.24)

यद्यप्यत्रात्मश्लाघावगम्यते परन्तूत्साहस्याधिक्यादेव न दोषः। नहि कश्चित्पुत्रः पितृव्यस्य चिन्तापरिम्लानमुखमुपेक्षितुं शक्नोति इत्युत्साहस्यैवात्र प्राबल्यम्। यथा वा मायामयीं रतिमपहरन्तं पलायनपरं शम्बरं युद्धार्थमाह्वयन्तमयं वक्ति-रे रे कन्यामलिम्लुच-

**समादत्से दंष्ट्रामिह विषधरस्यापि सरुषः**
**सटां दर्वादुत्पाटयसि सहसा कुञ्जररिपोः।**
**असेर्धारां घोरामपि रसवया लेक्षि नितरा-**
**मिमां यत्तन्वङ्गीमपहरसि नाशाय कुमते।।** (रति.4.25)।

अनेन मन्मथस्य निगूढाहङ्कारत्वमभिव्यज्यते। निगूढाहङ्कारोऽपि मन्मथ आत्मश्लाघायां नादरवान्। अत एवाविकत्थनताप्यत्र। चतुर्थेऽङ्के रतिमपहरन्तं शम्बरं निगृह्णात्येष युद्धार्थमाह्वानञ्च करोति। शम्बरेण तु त्वं खलु स्त्रीपुंसयोः रहसाङ्गराङ्गणोपयुक्तशौर्य इत्याद्युक्त्वा परिभूतः विकत्थनां विहाय सरोषस्मितम् एनं प्रत्युत्तरयति।

**"मन्मथः-(सरोषस्मितम्) दुर्मुख, कृतं विकत्थनेन। वाग्विदग्धं त्वां शरैरेव प्रत्युत्तरयामि, पूरयामि च कलहप्रियस्य मुनेराहवदर्शनकुतूहलम्।"**(रति. पृ.99)।

अनेनापि सन्दर्भेणास्य निगूढाहङ्कारतैवाभिव्यज्यते। यद्यपि रतिमन्मथे केचित्सन्दर्भाः सन्ति येऽस्य विकत्थनतामाविष्कुर्वन्ति। यथा-कोकिलकमुखाद्रतेरपहरणवार्तां श्रुत्वा विषादमनुभवति मदनः किन्तु सारथिना प्रकृतकर्तव्यं प्रति बोधितः सोत्साहमेष वक्ति-**"कोकिलक, विज्ञाप्यतां तातः। शापिताः स्थ मया। सर्वैर्भवद्भिरलङ्क्रियताममरावती। अहमेव तस्यासुरतस्करस्य दर्पं व्यपनेष्यामीति।"** (रति.पृ.96)।

अथ च-सूतेन शम्बरः कथमेकाकिनः जेतव्यः भवतः भविष्यतीति सन्देहे



आविष्कृते यदायं वक्ति-

**तां लङ्कां विशतः पुरा हनुमतः को वा द्वितीयोऽभवत्**
**तार्क्ष्यस्यापिं सुधाहृतौ सुरचमूमाधावतोऽनुद्रताम्।**
**पार्थस्याथ च गोग्रहे दलयतः स्वैरं कुरुन् सङ्गता-**
**नेवं सम्प्रति निघ्नतो रिपुबलं का मे सहायस्पृहा।।**

इत्यत्र आभ्यां सन्दर्भाभ्यां विकत्थनता विज्ञायते यत्किञ्चित् तथापि "बुद्ध्युत्साहस्मृतिप्रज्ञः कलामानसमन्वितः" इत्युक्त्वा नायके उत्साहस्य स्थितिस्त्वावश्यकी एवेति नात्र विकत्थना। अतः निगूढाहङ्कारता एवात्राप्यभिव्यज्यते।

मन्मथः रक्तलोकोऽस्ति। पितृव्यादिन्द्रादारभ्य परिजनं यावत्सर्वेऽपि अमुं स्निह्यन्ति। पितृव्यः इन्द्रः एतस्य पौरुषे विश्वस्तोऽपि वात्सल्यादेनं लोकशिवङ्करे कर्मणि नियोक्तुं शङ्कते। सः वाचस्पतिमात्मनः शङ्कायावदेयति-

**शतशोऽपि दृष्टविज्ञयं सर्वासाध्याय कर्मणे वत्सम्।**
**आदिशतो गिरिशे मे यत्सत्यं किमपि शङ्कते चेतः।।** (रति. 3.20)।

वसन्तोऽस्यामात्यः सततमेतत् हितचिन्तनपरोऽस्ति। स राज्यं तथा परिपालयति यथा विनिर्मुक्तराज्यभर एष रत्यामनुरक्ततयात्मनो दिवसान् यापयति। वसन्तः चरैः विजानाति यत् कल्याणी रतिः स्वामिने दित्सिता किन्त्वेदपि जानाति यद्रत्यर्थं शम्बरेण सहास्य कलहोऽप्येधत इति। किञ्च शिवमुमया संयोजयितुं विडौजा मन्मथस्य साहाय्यमिच्छति किन्त्वस्मिन्कर्मणि स्वामिनो मृत्युभयमप्यस्तीति। किमत्र करणीयं येन स्वामिनः कल्याणं स्यादिति चिन्तयतः वसन्तस्य लोचने प्रजागरक्लान्ते स्तः। (रति.पृ.58-62)

नन्दनकानने कीरसौहित्यार्थं स्वघुटिकाभिवातावतारितमाम्रफलमादातुमुपस्थितमेतं प्रसङ्गतः प्रत्यभिज्ञातयोः रतिसख्योः कोकिलवाणीकीरवाण्योः पारस्परिकवार्तालापेनाप्यस्य लोकप्रसिद्धिरवगम्यते। तद्यथा-

**"सख्यौ-(सविस्मयं जनान्तिकम्) कथं सैषः? यः किल श्रूयते भगवतो लक्ष्मीवल्लभस्य तनयः सीमा सौन्दर्यस्य स्त्रीपुंसयोर्विलासोपदेशिको मन्मथ इति।"**

मन्मथस्य सारथिरप्येनमधिकं स्निह्यति। स हि नहि केवलं मधुरवचसैवेनमाह्लादयति अपितु कालोचितादुपदेशादस्य मनसः विषादमपहृत्य कृत्यं प्रत्युन्मुखीकरोत्यपि। कोकिलकाद्रत्याः अपहारवार्तां श्रुतवतो मन्मथस्य धैर्यमुपदिशतः सूतस्यैवमेव रूपमवलोक्यते येनास्य तं प्रति स्नेहोऽभिव्यज्यते। किञ्च मन्मथं प्रति स्नेहाधिक्यादेव सारथिः शम्बरेण सहास्यैकाकिनः युद्धे जयं प्रति शङ्कितो भवति।

किम्बहुना वाशिनी, सर्वार्थसाधिका, रागः, मुदिता, स्वयं श्रीदेवी चैते सर्वेऽपि मन्मथं स्निह्यन्ति।

मन्मथः वाग्मी प्रियंवदश्चास्ति। समये समुचितं वचः सर्वथायं वक्ति येनास्य वाग्मितावगम्यते। समयः नन्दनकानने रत्या तत्सखीभ्याञ्च वार्तालापस्य भवतु, देवेन्द्रपरिषदि देवेन्द्रेणादेशसमर्पणस्य वा किमर्थं प्रातरेव वयं स्मृताः पाकशासनेनेति वसन्तेन सह परामृशतो वा सर्वत्र वागस्य किमपि वैशिष्ट्यमावहति। देवेन्द्रपरिषदि देवेन्द्रं प्रति यथा–

**"मन्मथः–(सव्रीडमिव) भगवन्, प्रभवन्ति हि प्रभवो भृत्यबहूपकरणे, किन्तु–**

**पुरस्कृतस्यात्मसमानसन्निधौ निजोपपीच्येन विधेयगौरवात्।**

**भवेदसंसाधितवस्तुनो न किं ह्रियेऽर्थवादोऽपि कुलप्रजाजुषः।।** (रति. 3.23)

अनेन वाग्मिता प्रियंवदता चोभयमभिव्यज्यते। परिजनं प्रत्यप्यस्य प्रयुक्तं वचः प्रियमेव भवति। सौधमासेदुषी पूर्वेद्युर्दृष्टा रतिः कथं भूयोऽपि दृश्यते इति विदूषकेण परामर्शकाले "मयोपायश्चिन्तित" इत्युक्त्वा तेनोक्तं परिहासोचितवचः श्रुत्वा प्रियंवदस्य मन्मथस्येदं प्रियं वचः यथा–

**"मन्मथः–(विहस्य, स्वगतम्) अलङ्कारोऽयमीदृशानां यदसम्बद्ध-व्यवहारितेति। (प्रकाशम्) सखे, जानामि ननु तव नैपुण्यम्। कथय तावत् अपि कश्चिदस्त्युपायस्तस्या हृदयङ्गमायाः सविशेषदर्शने।"** (रति. पृ.9)।

प्रातरेव देवराजेन किमर्थमाहूतोऽस्मीति पृष्टस्य वसन्तस्य "स्वामिन्....... अपितु सम्भावितानर्थेऽस्मिन्नर्थे स्वामिनं नियुयुक्षमाणेन सहस्राक्षेण स्वार्थपरता केवलमाविष्कृता।" (रति. पृ.64)। इति वचः श्रुत्वा प्रियंवदः कृतज्ञः मन्मथः वदति–**"मन्मथः–मन्त्रिम्, नैवमवगन्तव्यम्–**

**उक्तमनुक्तं वा ननु साध्यं वाऽसाध्यमीश्वरस्य कृते।**

**अर्हं वा यदि वानर्हं कार्यं कार्यं हितेन भृत्येन।।"** (रति. 3.16)

अनेन मन्मथस्य प्रियंवदता स्वामिभक्तिश्चोभयमपि अवगम्यते। मन्मथोऽतीव स्वामिभक्तोऽस्ति। सः केनापि उपायेन स्वामिनः कार्यं कर्तुं समुद्यतोऽस्ति। तन्मतेन- किमपि कार्यं कर्तुं योग्यं न वेति विचारं विहायैव स्वाम्यादेशपालनं सेवकस्य मुख्यं कर्तव्यमस्ति। अस्यामात्यः वसन्तोऽपि स्वामिभक्त एव। अत एव सः त्रिपुरारेर्विजयार्थं यत्र मृत्युभयमप्यस्ति तत्र मन्मथस्य भाविगमनं प्रति चिन्तितोऽस्ति। अस्मादेव



कारणाद् देवेन्द्रः स्वार्थपरायण इति स वदति। एतत्सर्वं जानन्नपि धीरस्वभावः मन्मथः नैजं कर्तव्यं प्रति सावधानः प्रियवचसैनं वारयति।

किञ्च स हि देवेन्द्रस्य सर्वथा कृतज्ञोऽस्ति। देवेन्द्रेणास्य सर्वाण्यपि सौख्य-साधनानि सम्पादितानि। मन्मथस्य यत्किमपि प्रभुत्वमैश्वर्यं वास्ति तत्सर्वं देवेन्द्रस्यैव कृपाभूतम्। एवंविधस्य प्रभोः कृते अनुजीविभिस्तनोर्नश्वरस्य मोहः नैव करणीयः। एतत् सर्वं वसन्तं स्मारयन् सः कथयति–

**"वाहा गन्धवहालिशायितरसा दानोद्धुराः सिन्धुरा**

**वित्तं स्वाश्रितदैन्यहारि सरसाभोगाश्च भोगाश्चिरम्।**

**मानश्चातिशयीति लभ्यमखिलं यस्मादिह स्वामिन–**

**स्तस्यार्थेऽप्यनुजीविभिः कियदिदं त्याज्या यदेषा तनुः।।"** (रति. 3.17)

इदमपि मन्मथस्य प्रियंवदतां कृतज्ञतां स्वकर्तव्यपरायणतां चाभिव्यनक्ति। मन्मथोऽतीव गम्भीरस्वभावोऽस्ति। रत्याः विरहाद् दूयमानहृदयोऽप्येष आत्मनो व्यथां न ह्याविष्करोति न च कामपराधीनचेताः किमप्यनार्यमाचरति। द्वितीयेऽङ्के वशिन्याः प्रभावदुपस्थापिते मन्मथसौधदृश्यप्रसङ्गे विदूषकस्य वयस्य, तथा परवशापि सा सुजाता किमिति त्वया हस्तेन न गृहीता इति वचनं श्रुत्वा क्षुब्धमानस इवायं वक्ति–

**"मन्मथः–सखे! किं मानवधीरमाशङ्कसे?"** (रति. पृ.38)।

एकत्र मन्मथोऽभिनवानुरागेण पूर्वरागेण वा दूयमानहृदयोऽस्ति। रत्याः समागमं प्रतिक्षणमपेक्षते। "सापि मयि तादृशी रक्ते"ति स्वयमनुभूतवान् श्रुतवांश्च वशिन्याः मुखात्। तत्पितृभ्यां मह्यं सा दित्सिताप्यस्ति एतदपि स जानाति। मद्गुरुभिः विज्ञातञ्चैतत् सर्वम्। अत एव रत्याः प्राप्तिविषये नास्ति कश्चित्संशयः। इदानीमेव अकस्मादेव देवकार्यार्थं देवेन्द्रेणाहूते अस्मिन् नियोज्यमाने कार्येऽनर्थस्यापि सम्भावनावलोक्यते। तदेतत्सर्वं जानतः मन्मथस्य हृदयं स्वामिसत्कारैः प्रेयस्यामनुरागेण च दोलायते। तथापि स्वनियोगं प्रति सावधान एवैषः। स आत्मदशां विचिन्तयति–

**एकतः स्वामिसत्कारैः परतः प्रेयसीगुणैः।**

**कृष्यमाणमिदं द्वेधा मम दोलायते मनः।।** (रति. 3.14)।

अस्यामप्यवस्थायामसौ धैर्यं नैव विजहाति किन्तु स्वकर्तव्यं प्रत्येव पक्षपातं प्रकटीकरोति। किञ्चास्मिन्नेवावसरे स्वामिभक्तेन वसन्तेन देवेन्द्रस्य स्वार्थपरतायाः विषये किमप्यवचनीये कथिते स्वकर्तव्यं स्मारयन् प्रियवचनपुरस्सरमेषस्तं निषेधति। अनेन प्रसङ्गेनास्य स्वामिभक्तिरप्यवगम्यते।

मन्मथोऽतीव भावुकहृदयोऽस्ति। चतुर्थेऽङ्के पुरारिं विजित्य कैलाशादमरावतीं

प्रति प्रस्थितोऽसौ कोकिलकाद्रत्या अपहरणवृत्तं विज्ञाय कोपं शोकञ्च सहैवानुभवति। प्रियाविरहाच्चिरकालिकाद् दूयमानमानसस्त्वस्त्येव तत्रापि तदीयां तदवस्थागतां वार्तां विज्ञाय मोहमुपयात्यनन्तरन्तु विषादमाविष्करोति–"विवेकं न्यक्कुर्वन् सहजमपि धैर्यं शिथिलयन्" इत्यादिना। अस्मिन्नेव समये सूतेन समयोचितमुपदिश्यते, यदिदानीं परिपन्थिनां विनिग्रह एव श्रेयानिति। सूतस्योपदेशेन हृष्टः भावुकहृदयः मन्मथः मुक्तकण्ठतया प्रशंसति–

**मन्मथः–(सधैर्यम्) साधु रथकुटुम्बिन् साधु।**

**प्रियमाश्वासनार्हञ्च बहवः सन्ति शंसितुम्।**

**हितस्य च यशस्यस्य वक्तारो विरलाः पुनः।।**(रति. 4।18)

भावुकहृदयत्वादयं परदुःखसंवेदनशीलतां (सहानुभूतिं) अपि बिभर्ति। द्वितीयेऽङ्के रत्याः परितापोपशान्त्यर्थं वशिन्या स्वप्रभावादुपस्थापिते मन्मथसौधदर्शनप्रसङ्गे वशिनीमुखात् रतिरतितरां परितापभूनिं गतेति विज्ञायायं तद्विरहव्यथां परिकल्प्य दुःखितो भवति। तद्यथा–

**"धिक् कष्टम्, परां कोटिं गतस्तापः शिरीषकुसुमसुकुमारैः सुतनोरवयवैः कथं सोढव्य इति व्यथते मे चेतः।"** (रति. पृ.51)।

अपि च–सखे!

**अनुरागातिशयं मयि ननु बुद्ध्वाऽऽनन्दमग्नमपि तावत्।**

**सीदतितरां मनो मे सुदृशो विरहव्यथां विचिन्त्येमाम्।।** (रति. 2.26)।

एवमन्यत्रापि मन्मथस्य भावुकता स्पष्टीभवति तत्र तत्र।

मन्मथः जगन्मातुः श्री देव्याः कृपापात्रोऽस्ति। अनुरूपपतिपाप्त्यर्थं मुदितारागयोः सुपुत्र्या रत्या विहितया सपर्यया हृष्टा श्रीदेवी स्वकीयावरणदेवतां सर्वार्थसाधिकां मन्मथेन सह रतिं सङ्गमयितुं नियोजयति– "मयूरिका–प्रिय सखि! कृतं विचारेण भर्तृदारिकाराधनपरितुष्ट्या स्वयमेव नियुक्तात्रार्यायाः सहपांसुक्रीडनसखी भगवती सर्वार्थसाधिकैव सर्वार्थं साधयिष्यति। (रति. पृ.29)"

सर्वार्थसाधिका स्वान्तेवासिन्याः वशिन्याः साहाय्येन रतिमन्मथयोरन्यो-न्यानुरागसंवर्द्धनद्वारा तत् सम्पादयति। श्रीदेव्याः निदेशोऽस्ति यदनयोर्विवाहानन्तरमेतौ मत्समक्षमानीयतामहं दर्शनेन एतौ कृतार्थयिष्यामि।

एतस्मिन्निदेशानुरूपं सर्वार्थसाधिका रतिमन्मथयोः परिणयानन्तरमेतौ समादाय श्रीपुरं याति त्रिपुरसुन्दरी स्वदर्शनेनाभीष्टवरेण च मन्मथं कृतार्थीकरोत्यपि।

तदेवं मन्मथस्य चरित्रं समासतः प्रस्तुतीकृतम्।

❖



# प्राणविद्याधिग्रहणे उपनिषदीया उपायाः

पराम्बा श्रीयोगमाया

**उपक्रमः**

श्वासोच्छ्वासः मनुष्यस्य कृते जन्मजातस्तता स्वतःसिद्धः। यदि सामान्यावस्थायां प्रक्रियायामस्यामवरोधः समागच्छति अथवा कस्मादस्वाभाविककारणात् श्वासोच्छ्वासयोः क्रियावरुद्धा भवति तर्हि तत्क्षणात् मनुष्यः मृत्युमाप्नोति। परन्तु प्राणविद्यायाः प्रक्रिया एतस्मात् विपरीता। अतः श्वासोच्छ्वासयोः गतिं प्रयत्नेनाभ्यासेन सहावरोधनं प्राणसाधनस्य सामान्यलक्षणम्। महर्षिपतञ्जलिना प्राणविद्यासाधनायाः एतादृशं लक्षणं प्रतिपादितमस्ति-

**तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः।** (पातञ्जलयोगदर्श.2.49)

अर्थात्, आसनसिद्धेरनन्तरं श्वासप्रश्वासयोः गतेः अवरुद्धावस्थायाः नाम प्राणायाम इति। अतः योगदर्शने प्राणसाधनस्य नाम प्राणायामः। परन्तु प्रमुखोपनिषत्सु केवलं मैत्रायण्युपनिषदं विहाय नान्यत्र कुत्रापि प्राणायामशब्दस्य साक्षात्प्रयोगः प्राप्यते।[1] अत्र षड्योगाङ्गानां वर्णनप्रसङ्गे प्राणायामशब्दस्य सर्वप्रथमप्रयोगोऽवाप्यते। अपरासूपनिषत्सु प्रायेण प्राणविद्यासाधनायाः उपायाः यथा पारम्परिक्यस्तथैव साधनापराकाष्ठायाः प्रमाणभूताः। जीवनस्य परमलक्ष्यपथे क्रमिकविकासाय चेतनायाः उत्तरणे ऋषित्वस्य निदर्शनकल्पाः एव एते उपायाः।

शरीरे नासिकामार्गेण यः प्राणवायुः परिगृहीतो भवति सः श्वासस्तथा यः वायुः नासारन्ध्रेण बहिः निःसार्यते सः प्रश्वासोऽथवोच्छ्वासः। 'प्राण ऊर्ध्वगामी वायुः। अपानोऽधोगामी वायुः।' (सायणः, तै.ब्रा.1.1.1.2) परिगृहीतः परिशुद्धः वायुः शरीरस्य कृते हितकारको भवति तथा बहिः निःसार्यमाणः वायुः शरीरस्य कृतेऽग्राह्यस्तथाहितकरो भवति।

बहुविधशास्त्रेषु 'प्राण' शब्दस्य कृते तात्पर्यबोधकाः बहुविधाः शब्दाः व्यवहृताः प्राप्यन्ते। योगदर्शने विशेषतया 'प्राण' शब्दस्य कृते 'श्वास' शब्दस्य प्रयोगः प्राप्यते। परन्तु प्रागुपनिषदीये वैदिकसाहित्ये प्रायेण वातः[2], आत्मा[3] आदिषु अर्थेषु 'प्राण'शब्दस्य प्रयोगोऽवाप्यते। प्राणमाध्यमेनैव शरीरमिदं चलत्क्षमं वर्त्तते। मनुष्यस्य सर्वविधाः चेष्टाः प्राणकारणादेव सम्भवन्ति।

### प्राणविद्यादिग्रहणोपायाः

ज्येष्ठस्य श्रेष्ठस्य च प्राणस्य सम्यक् परिज्ञानं, तत्साधनं तथा सिद्धिरित्यादयः प्राणविद्यारूपेण परिज्ञायन्ते। एतद् निर्विवादं तथ्यं यत् प्राणविद्या वैज्ञानिकप्रक्रियाधारिता। विद्यैषा मानवमाध्यात्मिकमार्गस्य शाश्वतसुखेन परमलक्ष्यं प्रति प्रचोदयति। आयुर्वेददृष्ट्यापि प्रक्रियायाः अस्याः अत्यधिकं महत्त्वं वरीवृत्यते। यतो हि आयुर्वेदस्याभिमुख्यं भवति स्वस्थपुरुषस्य स्वास्थ्यपरिरक्षणं तथातुरमनुष्यस्य विकारोपशमनम्। अतः प्राणविद्यासाधनया न केवलं स्वास्थ्यस्य परिरक्षणं भवति, अपितु तदभ्यासेन बहुविधानां शारीरिकविकाराणामुपशान्तिर्भवति। दोषाणां समस्थितिः धातुमलानां समक्रिया, जठराग्नेः दीप्तिः, इन्द्रियविकाराणां विनिवृत्तिः, मनोविकाराणामुपशमनम्, मनसः चाञ्चल्यवृत्तेः निरोधस्तथात्मनः ज्ञानानुभवः प्राणविद्ययैव सम्भवति। एते सर्वे आयुर्वेदसम्बन्धिताः विषयाः। यद्यपि प्राणविद्यायाः प्रमुखोद्देश्यं भवत्याध्यात्मिकमार्गस्य प्रशस्तीकरणं तथापि तन्मार्गे गमनस्याधिकारी भवितुं शारीरिकं स्वास्थ्यं तथा मनसः स्थैर्य्यमनयैव विद्ययाधिगम्यते।

### 1.1 प्राणसचेतनत्वम्

जीवनावधेः परिमापः यथा समन्वितश्वासग्रहणादेव क्रियते न तथा केवलं वर्षाणां मासानां दिनानां वा परिगणनात्। प्राणसाधनेनाथवा योगदर्शनवर्णितेन तदंशभूतेन प्राणायामेनैकः श्वासग्रहणस्य वारंवारतां न्यूनीकर्त्तुं चेष्टते तथानेनैव जीवनावधिः सम्प्रसारितो भवति। एतादृशं साधनं नान्यत् किञ्चिदपितु प्राणसचेतनत्वम्। योगिनः अनेनैवोपायेन मनसः शान्तिं सम्प्राप्नुवन्ति। प्राणसाधनया कश्चित् श्वासप्रक्रियायां गभीरचेतनत्वमनुभवति। जीवने प्राणचेतनत्वमेकं विशिष्टं कार्यम्। यतः परिशुद्धनियमितश्वासग्रहणमस्माकं सम्पूर्णजीवनं दिव्यपथि अग्रेसारयति। अपरपक्षे विशुद्धिरहितं श्वासग्रहणं मानवजीवनमसन्तुलितावस्थां प्रति नयति।



मानवः प्राणसचेतनतयैव सुसंस्कृतस्तथा विशुद्धो भवितुमर्हति। यतो हि नियन्त्रितप्राणस्य सहायतया वयमस्माकमन्तःस्थेनात्मना सह संयोगं स्थापितुं शक्नुमः। आध्यात्मिकोत्तरणं प्राणसचेतनतया प्रारभ्यते। नियमितश्वासाभ्यासेनैकः आत्माभिमुखी सन् आनन्दमधिगच्छति।

यदि कश्चित् सचेतसं प्राणस्यानुभवं करोति तर्हि सः प्राणस्य यत्नाय तथा संरक्षणाय समर्थो भवति। एतदर्थं स्वाभाविकश्वसनं तथा मनसः एकाग्रतेत्युभयोः समन्वयः आवश्यकः। स्वाभाविकं श्वसनमस्माकं शारीरिकस्थित्यर्थं तथा प्राणिकश्वसनमाध्यात्मिकजीवनायोद्दिष्टम्। स्वाभाविकश्वसने वयमचेतनत्वे न्यूनाधिकं वा श्वासग्रहणं कुर्मः, परन्तु सचेतना वयं यत् श्वसनं कुर्मः तत् कारणशरीरे संरक्षितं भवति। निरन्तरप्राणसाधनेनैकः एकाग्रतां, ध्यानस्य पूर्वावस्थां तथा भावनाः एकस्मिन् बिन्दौ एकत्र रूपेण प्राप्नोति।

सामान्यजीवनं सीमितम्, परन्तु प्राणायामेन भवत्वथवा ध्यानेन वयं तत्सीमानमतिक्रम्य दिव्यपथस्य पथिकाः भवितुमर्हामः। नियमितप्राणसाधनाभ्यासेन साधकः शीघ्रमाध्यात्मिकोत्तरणमधिगच्छति। सचेतसं प्राणनं मानवं चेतनां प्रत्युन्नयति।

### 2. उपनिषत्सु वर्णिताः प्राणविद्यायाः प्रक्रियाः

यथा कश्चित् सम्राट् स्वराज्यस्य व्यवस्थितशासनार्थमधिकारिणः भिन्नभिन्नप्रान्तेष्वथवा मण्डलेषु नियोजयति तथैव प्रतिशरीरं सम्राट् प्राणः शरीरस्य सुष्ठु परिचालनार्थं चक्षुरादीन्द्रियाणि तथा प्राणापानादीन् तेषां कार्यं विनिर्दिश्य तथा स्वयमेव सर्वोपरि विराजमानः सन् तान् कर्मसु प्रवर्त्तयति। विभक्तप्राणेष्वपानः पायूपस्थयोः उपस्थितः सन् शरीरमलानि निष्कासयति, मुखनासिकानेत्रकर्णादीनां द्वारेषु प्रविष्टः प्राणः शिरःप्रदेशे स्थितः सन् श्वासक्रियया शरीरं पोषयति, नाभिप्रदेशे स्थितः समानः जठराग्निमुद्दीपयति तथान्नरसादीन् पाचयित्वा सर्वं शरीराङ्गं समरूपेण प्रापयति। अनेन शिरस्थानि सप्तेन्द्रियाणि स्वस्वविषयग्रहणाय प्रवृत्तानि भवन्ति। स्वविषय-प्रकाशनसामर्थ्यादिना सप्तर्चिषः उच्यन्ते।

**एष ह्येतद्भूतमन्नं समं नयति तस्मादेताः सप्तर्चिषो भवन्ति।** (प्रश्न. 3.5)

परन्तु प्राणसहितानि सर्वेन्द्रियाणि जीवात्मानं केन्द्रीकृत्यैव स्वकर्मनिरतानि भवन्ति। अत्रैतादृशवर्णनस्योद्देश्यमेतत् यत् जीवात्मनः, हृदयदेशे अवस्थानं तथा

व्यानवायोः शरीरे स्थितिवर्णनकाले उपनिषदतिसूक्ष्मं तथा गुरुत्वपूर्णं तथ्यं महत्तरप्राणप्रक्रियायाः विषये परिवर्णयति। यथा–

**हृदि ह्येष आत्मा। अत्रैतदेकशतं नाडीनां तासां शतं शतमेकैकस्यां द्वासप्ततिर्द्वासप्ततिः प्रतिशाखा नाडीसहस्राणि भवन्त्यासु व्यानश्चरति।** (प्रश्न 3.6)

अर्थात् आत्मनः निवासस्थानं हृदयम् एव। पुनः नाभिप्रदेशात् 101 संख्यकाः नाड्यः प्रसृताः भूत्वा समग्रे शरीरे विस्तृताः सन्ति। ताभ्यः प्रत्येकं शतसंख्यकाः शाखाः निःसृता भूत्वा नाडीनां संख्या शतोत्तरदशसहस्रपरिमिता भवति। एताभ्यः पुनः प्रत्येकं द्विसप्ततिद्विसप्ततिसंख्यकाः नाड्यः प्रसृत्य सर्वासां नाडीनां संख्या 727200 इति। एतासु सर्वासु व्यानः रक्तं संचालयन्-समग्रे शरीरे व्याप्नोति। अतः सूक्ष्मातिसूक्ष्मनाडीष्वपि व्यानस्य सञ्चारः।

एवं शरीरस्य सूक्ष्मस्थानेष्वपि प्राणस्यावस्थितिमनुभूय प्राणसंरक्षणेन परमानन्दं स एव प्राप्नोति यः प्राणाविद्यायाः उत्तमज्ञाता भवति। प्राणसाधनं मानवाय उत्तमगतिं प्रददाति येन मानवजीवनस्य परिपूर्णतापादिता भवति। अन्तकाले प्राणसाधक उदानवायुः तस्य सत्कर्मणा दिव्यलोकं प्रति नयतीति उपनिषद् वक्ति।[4] सर्वेषां जीवनस्यान्तिमावस्थोदानेन प्राणापगमनेनैव भवति, अतः कस्य दिव्यलोकप्राप्तिर्भवतीति प्रश्नः स्वतः उदेति। अस्य समाधाने एव प्राणविद्यायाः उपयोगिता वर्त्तते। प्राणविद्यासाधनेन यः साधकः प्राणविद्यामुत्तमरूपेण जानाति तथा यस्य प्राणः सततसंस्कृतेन सदैव नियमितस्तिष्ठति अन्तिमकाले तस्य प्राणवायोः उत्क्रमणं सुषुम्नानामनाड्या भवति। मनुष्यशरीरेऽवस्थितासु 727200 नाडीषु एका मूर्धभेदनस्य कृते बहिर्गामिनी वर्त्तते। अनयैव नाड्या यस्य प्राणोत्सर्गो भवति तस्यैवामरत्वप्राप्तिर्भवति। यतो हि सुषुम्नानाड्या प्राणोत्सर्गः ऊर्ध्वं सूर्यमार्गं प्रति नयति। प्रश्नोपनिषदः तृतीयप्रश्नस्य सप्तमश्रुतेः एतादृशं वर्णनं सुषुम्नया ब्रह्मरन्ध्रभेदनस्य रहस्यं सांकेतिकरूपेण प्रददाति। श्रुतौ 'सुषुम्नया' स्थाने 'एकया' इत्युल्लेखः प्राप्यते। पुनरपि प्रश्नोपनिषदः चतुर्थप्रश्नस्य चतुर्थश्रुतौ उच्यते यत् यः श्वासप्रश्वासरूपमाहुतिद्वयं प्रदाय समानरूपेण शरीरे प्राणाग्निहोत्रं सम्पादयति सः समान एव। अर्थात्, यथा सुगन्धितपदार्थानामाहुतिभिः पारिपार्श्विकदुर्गन्धेः परिहारो भवति तथैव समानवायुनाऽद्धवायोः परिहारस्तथा शुद्धवायोः परिग्रहणं भवति। अत्र समानशब्देन प्राणापानयोः समानुपातेन विसर्जनादाने सूचिते



भवेतामिति वक्तुं शक्यते येन शरीरमध्ये समानवायोः कार्यमपि अप्रतिहतभावेन सम्पादितं भवेत्। प्राणाग्निहोत्रयागे मन एव यजमानः। मन एव प्राणबन्धनयुक्तम्। अतः नियमितप्राणेन नियन्त्रितं मन एव प्राणाग्निहोत्रायाथवा प्राणविद्यासाधनायै अधिकारी भवति। अस्य यागस्य फलमेवोदानवायुः यः मनोरूपयजमानाय सुषुप्ति-अवस्थां प्रदायानन्दं वितनोति। उदानेन मनोरूपयजमानः ब्रह्म गमयतीति श्रुतेः प्रतिपादनम्।[5]

**2.1. आत्मनः प्रकाशार्थं चित्तशुद्धेः सूचना–** न केवलं योगदर्शने चित्तवृत्तीनां निरोधनस्यावश्यकता वर्णिता प्राप्यते अपितु तत् प्रागेवोपनिषत्सु चित्तशुद्धेः अनन्तरमेव ध्यायन् विशुद्धसत्त्वः जीवः आत्मसाक्षात्करोतीति वर्णनं प्राप्यते। यथार्थज्ञानेन तथा विशुद्धसत्त्वेनैव आत्मा दर्शनीय इति मुण्डकोपनिषद् वर्णयति। आत्मज्ञानं नेन्द्रियसमूहैः, नापि तपसा, न केनापि कर्मणा नापि दैवप्रसादेन लभ्यते।[6] विशुद्धमनसि आत्मा विदितो भवति। परन्तु मनः पञ्चप्राणानां क्रियाकलापैः तथेन्द्रियसमूहैः ओतप्रोतम्।[7] अतः मनसः विशुद्धिरावश्यकी। एतदर्थं केवलमिन्द्रियेभ्यः चित्तस्य निरोधः उपदिष्टोऽस्ति। परन्तु चित्तवृत्तयः सामान्यजनैः सह विजडिताः। इन्द्रियवृत्तीनां निरोधार्थं मनसः विनिग्रहस्तथा मनसः निग्रहार्थं पञ्चवृत्तिकः प्राणः नियमनीयः। यतः प्राण एवेन्द्रियाणां प्रवर्तकस्तथा संचालकः। अतः विशुद्धप्राणेन विशुद्धमनः, विशुद्धमनसा विशुद्धबुद्धिः (चित्तम्) तथा विशुद्धचेतसा सूक्ष्मातिसूक्ष्ममात्मतत्त्वं विदितं भवतीति।

**2.2. उपनिषत्सु मनसः निग्रहवर्णनम्–** मन एवालौकिकचेतनजगतः प्रतिनिधिभूतम्। जीवानां जीवनक्रियायाः मौलिकं तत्त्वमथवा प्राणवायुः, वाक् तथा पञ्च ज्ञानेन्द्रियाणि इत्येतानि मनसः साधनानि। स्नायविकप्रक्रियायां प्राण अथवा जीवनीशक्तिः मानसिकचेतनाया एकं प्रमुखसाधनम्। प्राणकारणात् केवलं मनः वस्तुजगतः सम्बन्धं ज्ञानेन्द्रियैः अधिगृह्णाति। यावत्पर्य्यन्तं शरीरे प्राणशक्तेः स्नायविकस्तरे कार्यक्षमत्वं तावत्पर्य्यन्तं सर्वं सम्भवति।

आत्मा मनःप्राणयोः सहायेन ज्ञानकर्मेन्द्रियाणि तत्तत्कर्मसु एवं प्रेरयति यथा नित्यचिकित्साधिष्ठाता अथवा भोजनस्य ग्रहणयोग्यतापरीक्षणार्थं नियोजितः चक्रवाकः। राजा यदा भोजनं करोति तदा तद् भोजनं विषमुक्तमथवा विषयुक्तमिति परीक्षणार्थं चक्रवाकपक्षीसम्मुखे स्थापयति। विषयुक्तमन्नं दृष्ट्वा चक्रवाकस्य चक्षुषोः वर्णः परिवर्त्तते। एवं यथा चक्रवाकस्य संनिधिमात्रेण राज्ञि भोजनप्रवृत्तिर्जायते, तदर्थं न

किञ्चिदधिकमपेक्षते तथैव चलनक्रियायुक्तप्राणस्य सम्प्रेषणादीन्द्रियाणां विषयेषु स्वतः प्रवृत्तिर्जायते। आत्मा साक्षिभूतस्तथा निर्लिप्तः। परन्तु मनसः कार्यजातं प्राणकारणादेव सम्भवति। अतः प्राणसाधनया सूक्ष्मरूपेण शरीरस्थप्राणस्य नियमनेन मनसः संयमनं सम्भवतीति उपनिषदीयसिद्धान्तः-

**प्राणान्प्रपीड्येह संयुक्तचेष्टः**
**क्षीणे प्राणे नासिकयोच्छ्वासीत।**
**दुष्टाश्वयुक्तमिव वाहमेनं**
**विद्वान्मनो धारयेताप्रमत्तः।।**

अर्थात्, युक्तचेष्टः साधकः प्राणान् तावत् निरोधयति यावत् प्राणधारणसामर्थ्यं क्षीणं भवति। ततः नासिकापुटेन शनैः शनैः प्राणमुत्सृजेत्। तदनन्तरं साधकः सावधानतया दुष्टाश्वयुक्तरथस्य सारथिवत् मनसः नियन्त्रणं कुर्यात्।

अस्यां श्रुतौ प्राणमनसोः नियन्त्रणाय साधकस्य योग्यतादौ वर्णितास्ति। साधकः संयुक्तचेष्टः स्यात्।[8] अर्थात्, आहारादिषु व्यवहारेषु यः संयमितः आत्मसंमितः तस्यैव योगो भवति। (गीता 6.16) अनुसारमतिभुक्तस्य तथाभुक्तस्य योगो न भवति। प्रसङ्गेऽस्मिन् शतपथब्राह्मणे उच्यते-

**यदु ह वा आत्मसंमितमन्नं तदवति, तन्न हिनस्ति,**
**यद् भूयो हिनस्ति तद्यत्कनीयोऽन्नं तदवति।** (श. ब्रा. 9.2.1.2)

मनोनिग्रहणस्य विशदवर्णनं माण्डूक्योपनिषदः अद्वैतप्रकरणस्य 41 श्रुतितः 47 श्रुतिपर्य्यन्तमवाप्यते। मनसः निग्रहणस्य वैशिष्ट्यं परिवर्ण्य उच्यते यत् सर्वेषा योगिनामभयं मनसः विनिग्रहाधीनम्। न केवलमेतदपितु दुःखक्षयमपि मनोनिग्रहाधीनम्। यतः यावत् पर्य्यन्तं मनः इतस्ततः चलमानं तिष्ठति तावत् पर्य्यन्तं नानाविधदुःखानां सर्जनं भवति। परन्तु यदा मनः सुस्थिरं भवति तदैव दुःखानि अन्तर्हितानि भवन्ति। पुनः योगिनामात्मज्ञानमपि मनोनिग्रहाधीनम्, अतः मोक्षरूपाक्षयशान्तिरपि मनोनिग्रहानुकूला।[9]

### 2.2.1 मनसः निग्रहणार्थं धैर्य्यस्यावश्यकता

चित्तविक्षेपः चाञ्चल्यम् उद्वेगः इत्यादयः साधनापथे विघ्ना इति। योगसूत्रे व्याधि-स्त्यान-संशय-प्रमाद-आलस्य-अविरति-भ्रान्तिदर्शन-अलब्धभूमिकत्व-



अनवस्थितत्वमिति नव चित्तविक्षेपाः योगपथि अन्तरायभूता इति कथिताः सन्ति।[10] पुनरेतेषां नवबाधानां दुःखदौर्मनस्यं (चित्तक्षोमः) आङ्गमेजयत्वं (अङ्गकम्पनं)-श्वासप्रश्वास इति पञ्च सहायभूतास्तथा योगबाधकाः।[11] एतेषां योगबाधनां निवारणार्थं धैर्य्यस्य महती भूमिका वर्त्तते। अखण्डासीमधैर्य्यस्य रूपकल्पनमुपनिषदि एवमुच्यते यत् कुशाग्रेणैकबिन्दुना समुद्रस्योत्सेचनस्याथवा शुष्कीकरणस्योत्साहवत् प्रयत्नशीलः, उद्योगी तथाखिन्नचित्तः योगी तदैव मनोनिग्रहणं करोति यदा खेदशून्यस्तिष्ठति।[12]

### 2.2.2 मनोनिग्रहस्य विघ्नस्तथा तन्निराकरणोपायः

कामभोगविषयेषु विक्षिप्तं चित्तमेव मनोनिग्रहस्य विघ्नभूतमिति। अतः अविश्रान्तसाधनरतः साधकः निरवछिन्नभावेनात्मनि एव कामभोगेषु विक्षिप्तं मनः निरोधयेदथवा स्थिरीकुर्यात्। लयावस्थायाममथवा सुषुप्तौ अपि मनसः अत्यन्तप्रसन्नता नानुमोदिता भवति। अतिप्रसन्नतायुक्ता लयावस्था कामसममनर्थकारणमिति कल्पितमस्ति। अतः विषयकामेभ्यः यथा मनसः विनिग्रहः करणीयस्तथैव लयावस्थायामपि अतिप्रसन्नतातः मनसः निग्रहः आवश्यकः।[13] अर्थात् यथा दुःखात् मनसः दूरतापेक्षते तथैव सुखादपि। यतः सुखदुःखे स्थितधियः कृते चित्तोद्वेगकरे भवतः।

पुनरुच्यते यदविद्याया सर्वं द्वैतरूपं दुःखहेतुभूतमिति। एतत् सर्वं स्मृत्वा कामभोगेभ्यः (कामनानिमित्तभोगेभ्यः) अर्थात्, इच्छाजनिताविषयभोगेभ्यः सदैव मनः निवर्त्तयेत्। परन्तु मनसः स्वाभाविकचाञ्चल्यगुणं सतताभ्यासेन तथा वैराग्येण बाह्यविषयेभ्यः निरसनमावश्यकम्। 'परमतत्त्वं ब्रह्मैवाज'मिति शास्त्राचार्यवचनमनुस्मृत्य तद्विपरीतं द्वैतजातं तुच्छमिति सततचिन्तनमेव मनसः निग्रहणोपाय इति उपनिषद् वक्ति।[14]

चेतनावतः योगिनः एतादृशी साम्यावस्था वर्णितास्ति यत् मनसः साम्यावस्थायां यत् सुखमवाप्यते तस्यापि आस्वादनं न करणीयमिति। तस्मात् निःसङ्गः अर्थात्, वीतस्पृहः तिष्ठेत्। तदानीमेषानुभूतिः कल्पनीया यत् सुखमेतदविद्याकल्पितम्। अतः सुखरागात् साधकः आत्मानं निवर्तयेत्। सुखरागात् निवर्त्तितं चित्तं यदा निश्चलावस्थां प्राप्य पुनः बहिर्मुखि भवितुमुद्यतं भवति तदानीं पुनः प्रयत्नपूर्वकं तदात्मैकाग्रं करणीयम्। साधानायां सिद्ध्यर्थं चित्स्वरूपे मनसः सत्तामात्रमपेक्षितम्।[15]

### 2.2.3 मनोनिग्रहस्यान्तिमपरिणतिः

उपयुक्तोपायैः निगृहीतं मनः यदा सुषुप्तौ न लीयते तथा न पुनः विषयभोगेषु विक्षिप्तं भवति तदानीं चित्तं वायुशून्ये स्थाने निश्चलं दीपकमिव कल्पितविषयभावैः न प्रकाशितमथवा प्रभावितं भवति। चित्तं यदैवं भवति तदानीं ब्रह्मतादात्म्यमाप्नोति अथवा ब्रह्मस्वरूपं निष्पन्नं भवति।[16] तदानीं तं परमानन्दं ब्रह्मविदः स्वात्मनि स्थितिकारणात् स्वस्थं सर्वविधानर्थनिवृत्तिकारणात् शान्तं, कैवल्यभावात् सनिर्वाणं, अत्यन्तासाधारणविषयकारणादकथ्यं, निरतिशयसुखमिति योगिना प्रत्यक्षानुभवात् सुखमुत्तममिति वदन्ति-

**स्वस्थं शान्तं सनिर्वाणमकथ्यं सुखमुत्तमम्।**

**अजमजेन ज्ञेयेन सर्वज्ञं परिचक्षते।**।(माण्डूक्य,अद्वैत.,गौड,कारिका 47)

मनसः निग्रहणस्यैतदात्यन्तिकं तथा पारमार्थिकं सुखं व्यावहारिकजीवने साधकायाभयं, दुःखक्षयं, प्रबोधं तथाक्षयशान्तिं प्रयच्छति। अनेन साधकः यथार्थजीवनानन्देन जीवनस्य परिपूर्णतायै दिव्यपथस्य पथिको भवति।

## 3. निष्कर्षः

विद्वान् यदा बाह्यविषयेभ्यः मनसः निग्रहणं करोति अर्थात्, संकल्पविकल्पात्मकं मनः यदा निःसंकल्पं करोति तदानीं सः सर्वविधकामभोगेभ्यः दूरस्थो भूत्वा प्रशान्तचित्तो भवति। ततः तुरीयाख्यायां चतुर्थावस्थायां प्राणान् धारयेदिति उपनिषदुपदिशति। यतो हि प्राणवान् जीवः प्राणेभ्योपि महत्तरतत्त्वात् समुद्भूतोऽस्ति। अतः तन्महत्तरतत्त्वाय मनोनिग्रहणादनन्तचेतनायाः चतुर्थावस्थायां तुरीयायां प्राणधारणं करणीयमिति। जगत्सकलात् परे, मनसः शक्तेः परे तथा मनसः नीरवतायां किञ्चित् तत्त्वं वर्त्तते। तदेव परमं गुह्यं तथान्ते तस्मिन्नेव साधकस्य सूक्ष्मशरीरमाश्रितं भवति। तद्भिन्नं नान्यत् किञ्चित् तत्त्वं वर्त्तते इति मैत्रायण्युपनिषद् वर्णयति।[17] आदौ स्वाभाविक-प्राणस्याथवाधिभौतिकप्राणस्य नियन्त्रणेन मनसः स्थिरतापादनीया। ततः मनसः निश्चलावस्थायां तथा चेतनायाः स्तरेऽधिभूतादधिदेवं प्रत्युन्नीतः प्राणः तुरीयावस्थायां विधारणीयः यत्रात्मतादात्म्यं प्राप्य प्राणः अध्यात्मतामधिगच्छति। प्राणसाधनायां सर्वोच्चसोपाने सम्प्राप्त्यर्थमस्य स्थूलशरीरस्यापि भूमिका वर्त्तते। अतः देहः, प्राणः, मनः, चित्तम्, आत्मा इत्येतेषां मध्येऽन्तरङ्गः कश्चित् सम्बन्धः वर्त्तते। साधकः



अस्मिन् सम्बन्धे प्राण-मानसिकशक्तिबुद्धि-आत्मा-परमात्मेत्येतेषामान्तरङ्ग्यं प्राणसाधनामाध्यमेनानुसन्धाति। एषा प्राणसाधना साधकं प्रेरयति, लक्ष्यपथे प्ररोचयति, नियमयति तथा शरीरे सर्वविधां प्रक्रियां साम्यावस्थायां स्थापयति।

अतः प्राणसाधना न केवलमध्यात्मजीवनायापितु व्यावहारिकजीवनस्य परिपूर्णतायै तथा सफलतायै अस्याः उपयोगितानस्वीकार्या।

❖

## सन्दर्भाः


1. तथा तत्प्रयोगकल्पः प्राणायामः प्रत्याहारो ध्यानं धारणा तर्कः समाधिः षडङ्ग इत्युच्यते योगः। (मै.उ.6.18)

2. अथर्व. 11.4.15, तै.सं. 5.7.25.1, 7.5.25.1, तै.आ. 3.5.1

3. ऋक्. 1.34.7, 7.87.2, 10.92.13, 10.16.3, 10.168.4

4. अथैकयोर्ध्व उदानः पुण्येन पुण्यं लोकं नयति।
   पापेन पापमुभाभ्यामेव मनुष्यलोकम्।। (प्रश्न 3.6)

5. यदुच्छ्वासनिश्वाःसवेतावाहुती समं नयतीति स समानः। मनो ह वाव यजमानः। इष्टफलमेवोदानः। स एवं यजमानमहरहर्ब्रह्म गमयति। (प्रश्न 4.4)

6. न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवस्तपसा कर्मणा वा।
   ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्फलं ध्यायमानः।।
   (मुण्डक. 3.1.8)

7. एषोऽणुरात्मा चेतसा वेदितव्यो
   यस्मिन् प्राणः पञ्चधा संविवेश।
   प्राणैश्चित्तं सर्वमोतं प्रजानां
   यस्मिन् विशुद्धे विभवत्येष आत्मा।। (मुण्डक. 3.1.9)

8. संयुक्तचेष्टः "नात्यश्नतः" (गीता 6.16) इति श्लोकोक्तप्रकारेण संयुक्ता चेष्टा यस्य स संयुक्तचेष्टः। (शा.भा., श्वेताश्वर 2.9)

9. मनसो निग्रहायत्तमभयं सर्वयोगिनाम्।
दुःखक्षयः प्रबोधश्चाप्यक्षया शान्तिरेव च।।
(माण्डूक्य. अद्वैतनामतृतीयप्रकरणे गौडपादकारिका, 40)

10. व्याधिस्त्यानसंशयप्रमादाऽऽलस्याऽविरतिभ्रान्तिदर्शनाऽलब्धभूमिकत्वाऽनवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः। (योगसूत्रम् 1.30)

11. दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः।। (योगसूत्रम् 1.31)

12. उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिन्दुना।
मनसो निग्रहस्तद्वद्भवेदपरिखेदतः।। (माण्डूक्य, अद्वैत, गौड.कारिका41)

13. उपायेन निगृह्णीयाद्विक्षिप्तं कामभोगयोः।
सुप्रसन्नं लये चैव यथा कामो लयस्तथा।।(माण्डूक्य,अद्वैत,गौड.कारिका,42)

14. दुःखं सर्वमनुस्मृत्य कामाभोगान्निवर्तयेत्।
अजं सर्वमनुस्मृत्य जातं नैव तु पश्यति।।(माण्डूक्य,अद्वैत,गौड.कारि.,43)

15. नास्वादयेत्सुखं तत्र निःसङ्गः प्रज्ञया भवेत्।
निश्चलं निश्चरच्चित्तमेकीकुर्यात्प्रयत्नतः।। (माण्डूक्य, अद्वैत,गौड.का.,45)

16. यदा न लीयते चित्तं न च विक्षिप्यते पुनः।
अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत्तदा।। (माण्डूक्य,अद्वैत, गौड.कारि.,46)

17. अथान्यत्राप्युक्तं - यदा वै बहिर्विद्वान्मनो नियम्येन्द्रियायाश्च प्राणो निवेशयित्वा निःसंकल्पस्ततस्तिष्ठेत्। अप्राणादिह यस्मात् संभूतः प्राणसंज्ञको जीवस्तस्मात्प्राणो वै तुर्याख्ये धारयेत्प्राणमित्येव ह्याह। उचितं चित्तमध्यस्थमचिन्त्यं गुह्यमुत्तमम्। तत्र चित्तं निधायेत तच्च लिङ्गं निराश्रयम्। (मैत्रायणी. 6.19)

❖



# वाल्मीकीये रामायणे राक्षसीपात्राणां त्रैगुण्यविमर्शः

नीलमणि कुमार पाठकः

'राक्षस' इति शब्दं संश्रुत्य मनस्तत्प्रजातेः आहारविहारव्यवहारविषये कल्पनाकुलं जायते। राक्षसा विकटकायिनो वीर्योद्धता अनियताचरणाः क्रूरकर्माणश्चासन्निति सामान्यमतिः, परन्तु तेषु केचन विभीषणत्रिजटासरभावत् पूताचरणा अप्यासन्नेतदपि तथ्यं सत्यम्।

कामं राक्षसा वपुषा कर्मणा च भीत्युत्पादका जुगुप्साहेतवस्तथाऽपि संस्कृतसाहित्ये आदित एव तेषामनुपेक्षणीयं चरितमुपलभ्यते।

आर्यसंस्कृतेस्ते प्रतिस्पर्धिनः, किं वाऽन्धविरोधिनोऽहंवादिनश्च प्रतीयन्ते।

लौकिकसंस्कृतसाहित्ये राक्षसानां विस्तृतं विवरणं सर्वदौ वाल्मीकिरामायणे उपलभ्यते। रामायणे एव तेषां चरमोन्नतिश्च चरमावनतिश्चालोच्येते। राक्षससंस्कृतेः सामग्रिकपर्यालोचने रामायणग्रन्थो नितरां वैशिष्ट्यावह उपकारकश्च।

के राक्षसाः? कुत्र तेषां वासः? इत्यस्मिन् सन्दर्भे श्रीमतः चिन्तामणिविनायक-वैद्यमहोदयस्यैवं मतिः "द रिडिल ऑफ द रामायण" इति पुस्तके-

"वाल्मीकिना मुख्यत उत्तरभारतस्यार्यसभ्यता चित्रिता अस्ति। प्रसङ्गवशतस्तेन संस्कृतीतराणामपि वर्णनं ख्यापितं, यासां सम्पर्के दक्षिणादिकप्रयाणकाले आर्या आगताः। ता इतरजातयो धनवैभवेषु सम्पन्नाः सत्योऽपि वस्तुतः भारतस्यादिमा जातय आसन्। आर्यैः सह सहयोगेन विरोधेन वा ता दिव्या उत दुष्टयोनय इत्येवंरूपेण उद्धृताः।"

"इमा मुख्यतो भारतस्य मूलनिवासिन्यो द्रविड़जातय आसन्। एतासां पृथक् राज्यं, धनवैभवं राज्यव्यवस्था चासन्। एतासु राक्षसवानरेति प्रजातिद्वयं

मुख्यतयोल्लेखनीयम्। एतदतिरिक्तम् आन्ध्र, पुण्ड्र, चोल, पाण्ड्य-प्रभृतीनामप्युल्लेखोऽस्ति, परन्तु न विशदतया सम्भवत एतासां रामायणकथानकेऽप्रासङ्गिकत्वात्" इत्येवं मतिरस्ति "साउथइंडिया इन द रामायण" इत्यस्मिन् लेखे वी.आर.रामचन्द्रदीक्षितारमहोदयस्य।

अयम् आशयः-काश्चन मौलिकाः जातयः भारतस्य दक्षिणभागनिवासिन्यः उत्तरभारतवासिनामार्याणां समसामयिक्यः आसन्। ताः सर्वथा समृद्धाः सत्योऽपि आहारेण व्यवहारेण च आर्येभ्यो नूनमेव पार्थक्यं निर्वहन्ति स्म।

रामायणे आर्यसंस्कृतेः प्रतिष्ठापकः श्रीरामो दक्षिणाभियाने वानराणां राक्षसानां च यथास्थलं संस्कृतीकरणेऽनायासेनायासेन वा तत्परो दृश्यते।

आर्यसंस्कृतौ स्त्रीणां समधिकादरः परन्तु तत्संस्कृतावपि शनैः शनैः स्त्रीणां स्थितिः उपहास्यतां गता कैकेयीमन्थरादिवत्, परिवारे समाजे च बहुपत्नीप्रसङ्गात्। बहुपत्नीप्रसङ्गेन पुरुषा अप्यत्र गर्हिता जाता दशरथादिवत्। संस्कृतेर्मूलं परिवारः षाड्यान्त्रिको बभूव बहुपत्नीप्रसङ्गात्। नष्टे परिवारे कुत्र समाजः? कुत्र च संस्कृतिः? आर्यसंस्कृतेः सारभूतं वर्णाश्रमधर्मपुरुषार्थचतुष्टयादिकमेव सङ्कटापन्नं जातम्। एतदुद्धर्तुं दृष्टान्तस्वरूपः श्रीराम आजीवनं वने राज्ये वा सर्वावस्थायामेकपत्नीव्रती बभूव। अनन्तरं बालिरावणादिवधव्याजेन श्रीरामः प्रजात्यन्तरेष्वपि स्त्रीसमादरस्य बीजमुप्तवान्।

समष्टेर्व्यष्टेर्वोन्नयनावनयनयोराधारभूतास्त्रिगुणाः। त्रिगुणादृते न किञ्चिल्लोकेऽस्तीति गीतामतिः-

**न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः।**

**सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः।** (गीता 18.40)

अतो नाश्चर्यमत्र यदि त्रैगुण्याभिभूता राक्षसाश्चारित्र्यवैचित्र्येण नानाविधं व्यवहरन्ति स्म। विभीषणरावणशूर्पणखासरमात्रिजटामन्दोदर्यादीनां चारित्रिकं वैभिन्यं सत्त्वरजस्तमसां प्रभावाख्यापकम्। रावणस्यौद्धत्ये कैकस्याः, सीतापहरणे शूर्पणखायाः अशोकवाटिकायां सीताया मनोबलरक्षणे त्रिजटासरमयोर्भूमिकया कोऽपरिचितः?



## ताटका

ताटका जन्मना राक्षसी नास्ति। सा यक्षकुलोद्भवा यक्षराजसुकेतोः कन्या। तस्याः पतिः सुन्दः। अगस्त्यशापेन निहते सुन्दे सपुत्रा ताटका ऋषिं हन्तुमयतत। ऋषिशापेन सपुत्रा सा यक्षयोनितः राक्षसयोनौ च्युता।

**राक्षसत्वं भजस्वेति मारीचं व्याजहार सः।**

**अगस्त्यः परमामर्षस्ताटकामपि शप्तवान्।।** (वा.रा. 1.25.12)

राक्षसयोनिमापन्नामर्षपूर्णा बैधव्यविकला कर्तव्याकर्तव्यविवेकशून्या ताटका रामं प्रहरति रजस्तमसोः प्रभावात्। यथोक्तं गीतायाम्-

**काम एषः क्रोध एष रजोगुणसमुद्भवः।** (गीता 3.37)

**अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम्।**

**मोहादारभ्यते कर्म यत्तत्तामसमुच्यते।** (गीता 18.25)

एष आशयः-सत्त्वमभिभूय रजस्तमसश्चाभिवृद्धौ जीवनं कामक्रोधायतं सत् ताटकाया इव गर्हितं नष्टं च भवति।

प्रवृद्धे सत्त्वे ताटकाऽपि यशस्विनी आसीत्।

वाल्मीकिना तस्यै "यशस्विनीम्" (1.25.8) पदं व्यवहृतम् अस्ति। रजस्तमसोः प्रवृद्धौ तस्यै "यज्ञविघ्नकरी" (2.6.22) "दुष्टचारिणी" (1.24.29), "जातसंरम्भा" (1.25.11), "क्रोधमूर्च्छिता" (1.25.14) इत्यादीनि विशेषणानि प्रयुक्तानि।

## शूर्पणखा

रावणस्य भगिनी शूर्पणखा राक्षसीपात्रेष्वन्यतमा। अरण्योत्तरकाण्डयोस्तस्या वर्णनमुपलभ्यते। उत्तरकाण्डे सा पतिव्रतारूपेण चित्रिताऽस्ति। काण्डेऽस्मिन् तस्याश्चरित्रं सत्त्वप्रधानम्। युद्धोन्मत्तेन रावणेन शूर्पणखायाः पतिरनवधानतया हतः। निहते पत्यां सा वैधव्यकारणतः शोचति विलपति च-

**कृतास्मि विधवा राजंस्त्वया बलवता बलात्।** (7.24.27)

**राजन् वैधव्यशब्दं च भोक्ष्यामि त्वत्कृतं ह्यहम्।** (7.24.29)

राक्षसकुलोद्भवाऽपि शूर्पणखा जीवने एकेन पत्यैव सिद्धमनोरथा भवितुमिच्छति। वैधव्यं नेच्छति। वाल्मीकिप्रयुक्तं "भोक्ष्यामि" (7.24.29) इति पदं तस्याः पातिव्रत्यसूचकम्। शूर्पणखाया एतादृशो व्यवहारः तस्यां स्थितस्य प्रवृद्धसत्त्वस्य प्रमाणम्। परन्तु, कालक्रमेण सा रजस्तमोभ्यामभिभूता सती कामक्रोधावर्ते निमज्जत्यकरणीयञ्चाचरति।

अरण्यकाण्डे वाल्मीकिना तस्यै काममोहिता (3.17.9), वामभाषिणी (3.17.11), सुदुवृत्ता (3.17.11), शरीरजसमाविष्टा (3.17.12), मदनार्दिता (3.17.19) इत्यादीनि विशेषणानि प्रयुक्तानि। एतेन तस्यां रजस्तमसोर्वृद्धिरनुमीयते। अरण्यकाण्डे तयाचरितं कपटकर्म रजस्तमसोरभिवर्धनं सूचयति। सा दुष्पूरकामकवलिता सती सीतामुपेक्ष्य रामलक्ष्मणौ कामोपशान्तये निवेदयति। परिणामतोङ्गच्छेदम् अवाप्य लोकोपहास्यतां गता।

## सिंहिका

सिंहिका सागरस्याधोनिवासिनी राक्षसी। सा लङ्कापुरीं प्रहरिणीवद्रक्षति। सागरमुपर्युपरि सञ्चरतां जीवानां भक्षिका सा सीतामन्वेष्टुकामं नभस्युड्डीयमानं हनुमन्तं बुभुक्षति। परन्तु हनुमत्प्रहारेण तस्याः प्राणान्तं जातम्। शुभकार्ये तस्या अवरोधमतिः पुनश्च भोजनोपक्रमः तस्यां वर्धितं तमः सूचयतः। तामसिकाहारविषये यथा गीतामतिः–

**यातयामं गतरसं पूति पर्युषितं च यत्।**

**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्।।** (17.10)

## लङ्का

लङ्कानामधेया राक्षसी लङ्कापुर्यां प्रहरिणीरूपेण नियुक्ता। सा स्वयमेव हनुमते स्वीयं परिचयं ददाति–

**अहं राक्षसराजस्य रावणस्य महात्मनः।**

**आज्ञाप्रतीक्षा दुर्धर्षा रक्षामि नगरीमिमाम्।।** (5.3.28)

**न शक्यं मामवज्ञाय प्रवेष्टुं नगरीमिमाम्।** (5.3.29)

परवशा स्वदायित्वानुपालिका सा हनुमन्तं लङ्कापुरीप्रवेशाद् वारयति। किन्तु,



हनुमत्प्रहारेण प्राणविह्वला भूत्वा प्रार्थयत–

**निर्जिताहं त्वया वीर विक्रमेण महाबला।** (5.3.45)

**सीतानिमित्तं राज्ञस्तु रावणस्य दुरात्मनः।**

**रक्षसां चैव सर्वेषां विनाशः समुपागतः।।** (वा.रा.5.3.49)

प्रसङ्गेऽस्मिन् गोप्यमपि ब्रह्मवचः सा हनुमते प्रकटयति। एकतः सा पुरीं रक्षति, एतदर्थं हनुमन्तं प्रहरत्यपि। हनुमता ताडितापरतस्तं लङ्कां प्रवेष्टुं प्रेरयत्यपि-

**तत् प्रविश्य हरिश्रेष्ठ पुरीं रावणपालिताम्।**

**विधत्स्व सर्वकार्याणि यानि यानीह वाञ्छसि।।** (वा.रा. 5.3.50)

चरित्रेण लङ्का राजसिकी तामसिकी च प्रतीयते, स्वस्या मनश्चाञ्चल्यात्। सा हर्षशोकान्वितधीरपि। यथोक्तं गीतायां श्रीकृष्णेन–

**रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।**

**हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः।।** (18.27)

कामं लङ्का रजस्तमश्चरित्रा स्वस्याः पराधीनवृत्तित्वात्, परन्तु प्राप्तेऽवसरे तस्यामपि सत्त्वाद्रेको लक्ष्यते। रामकार्यसिद्ध्यर्थं रावणविनाशाय च सा दृष्टमना भवति।

## मन्दोदरी

मन्दोदरी मयाभिधस्य राक्षसस्य पुत्री। तस्या माता हेमानाम्नी अप्सराः। राक्षसीपात्रेषु मन्दोदर्यनुपमा। सा सत्त्वप्रधाना। मन्दोदरी रामायणस्य प्रतिनायकभूतस्य रावणस्य प्रिया ज्येष्ठा च पत्नी। रामायणे तस्या वर्णनं संक्षिप्तम्। सा बालिपत्नीतारावत् स्वपतिमनाचारेभ्यो निवारयन्ती निष्फला जाता। व्यापादिते दशानने मन्दोदर्या विलापस्तच्चरित्रसंसूचकः। तदित्थमस्ति–

**इन्द्रियाणि पुरा जित्वा जितं त्रिभुवनं त्वया।** (वा.रा. 6.111.15)

**स्मरद्भिरिव तद्वैरमिन्द्रियैरेव निर्जितः।** (वा.रा. 6.111.15)

**अवश्यमेव लभते फलं पापस्य कर्मणः।**

**भर्तः पर्यागते काले कर्ता नास्त्यत्र संशयः।।** (वा.रा. 6.111.25)

**सर्वदा सर्वभूतानां नास्ति मृत्युरलक्षणः।**

**तव तद्वदयं मृत्युर्मैथिलीकृतलक्षणः।।** (वा.रा. 6.111.29)

**सन्त्यन्याः प्रमदास्तुभ्यं रूपेणाप्यधिकास्ततः।**

**अनङ्गवशमापन्नस्त्वं तु मोहान्न बुध्यसे।।** (वा.रा. 6.111.27)

एतादृशः स्पष्टविवेकः सत्त्वाभिवृद्धिं विनाऽसम्भवः। यथोक्तं गीतायाम्-

**प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।**

**बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी।।** (गीता 18.30)

## त्रिजटा

त्रिजटा जन्मना राक्षसी, परन्तु स्वभावेन परिष्कृता सत्त्वप्रधाना च। महर्षिणा वाल्मीकिनाऽस्यै "वृद्धा प्रबुद्धा" (5.27.4) इति विशेषणे प्रयुक्ते, येनास्याः सात्त्विक- चरित्रस्य पुष्टिर्भवति।

अशोकवाटिकायां क्रूरराक्षसीनां गर्जनतर्जनाभ्यां सीतां सा सर्वथा त्रायते सर्वदा चोत्साहवर्धनं करोति-

**मा विषादं कृथा देवि भर्तायं तव जीवति।** (वा.रा.6.48.22)

**त्यजशोकं च दुःखं च मोहं च जनकात्मजे।**

**रामलक्षणयोरर्थे नाद्य शक्यमजीवितुम्।।** (6.48.33)

स्वप्ने सा रामस्याभ्युदयं रावणस्य पराभवञ्च पश्यति। सर्वदान्तःकरणे रामचिन्तनरताया एतत् प्रमाणम्। त्रिजटा रामकार्यसाधिका सीतायाः शीलानुरक्ता च स्वस्यां सत्त्वाभिवर्धनात्-

**अन्ततं नोक्तपूर्वं मे न च वक्ष्यामि मैथिलि।**

**चरित्रसुखशीलत्वात् प्रविष्टासि मनो मम।।** (6.48.29)

## सरमा

सरमा गन्धर्वस्य शैलूषस्य पुत्री विभीषणेन सह परिणीता च। निजहितकामनया रावणेनैषा सीतारक्षणार्थं नियुक्ता। सरमा सीतया सह सखीवद् आचरति। एषाऽपि



त्रिजटावद् रामकार्यहितैषिणी सीतायाः कल्याणाभिलाषिणी च। सरमा दयार्द्रचित्रा दृढव्रता मृदुभाषिणी च, यथा वर्णितमस्याश्चरितं वाल्मीकिना-

**सीतां तु मोहितां दृष्ट्वा सरमा नाम राक्षसी।**

**आससादाथ वैदेहीं प्रियां प्रणयिनी सखीम्।।** (6.33.1)

**मोहितां राक्षसेन्द्रेण सीतां परमदुःखिताम्।**

**आश्वासयामास तदा सरमा मृदुभाषिणी।।** (6.33.2)

**सा हि तत्र कृता मित्रं सीता रक्ष्यमाणया।**

**रक्षन्ती रावणादिष्टा सानुक्रोशा दृढ़व्रता।।** (6.33.3)

वाल्मीकिनाऽस्यै **"धर्मज्ञाम्"** (7.12.24।।) इति विशेषणं प्रयुक्तम्। सीतारामौ प्रत्यस्या गाढ़ानुरागस्तस्यां प्रवृद्धसत्त्वस्य संसूचकः।

## सालकटङ्कटा

सालकटङ्कटा राक्षसवंशावल्या महत्त्वपूर्णक्रमः। एषा विद्युत्केशस्य पत्नी। एतस्या मातुर्नाम सन्ध्या। सालकटङ्कटा नवजातं शिशुं परित्यज्य रत्यर्थं पतिमभिषेवते-

**समुत्सृज्य तु सा गर्भं विद्युत्केशरतार्थिनी।** (7.4.24)

**रेमे तु सार्धं पतिना विस्मृत्य सुतमात्मजम्।** (7.4.25)

विषयिण्या अस्याश्चरितं राजसिकं प्रतिभाति।

## कैकसी

कैकसी रावणस्य माता। रावणस्यौद्धत्यवर्धने एतस्या अपि योगदानं महत्त्वाकाङ्क्षावशात्। कैकस्याः पिता राक्षसराजः सुमाली। विष्णुना पराजितः सः स्वकुलाभ्युदयमहर्निशं चिन्तयति। पुत्र्या कैकस्या सह परिभ्रमन् सः मुनिं विश्रवसं विलोक्य राक्षसानामभ्युदयार्थं तेन सह परिणेतुं पुत्रीमयाचत-

**सा त्वं मुनिवरं श्रेष्ठं प्रजापतिकुलोद्भवम्।**

**भज विश्रवसं पुत्रि पौलस्त्यं वरय स्वयम्।।** (7.9.11)

पितुरादेशेन कैकसी पितृगौरवादसमयं मुनिमभ्यवन्दत-

**आत्मप्रभावेण मुने ज्ञातुमर्हसि मे मतम्।।** (7.9.19)

**किं तु मां विद्धि ब्रह्मर्षे शासनात् पितुरागताम्।**

**कैकसी नाम नाम्नाहं शेषं त्वं ज्ञातुमर्हसि।।** (7.9.20)

मुनिविश्रवास्तस्या अभिप्रायं विज्ञायाशिषं ददाति–

**सुताभिलाषो मत्तस्ते मत्तमातङ्गगामिनि।**

**दारुणायां तु वेलायां यस्मात् त्वं मामुपस्थिता।।** (7.9.22)

**दारुणान् दारुणाकारान् दारुणाभिजनप्रियान्।** (7.9.23)

**प्रसविष्यसि सुश्रोणि राक्षसान् क्रूरकर्मणः।** (7.9.24)

मुनेवर्चनं संश्रुत्य कैकसी मुनिं प्रणिपतति, दुष्टकर्मणां पुत्राणामनिच्छावशात्–

**भगवन्नीदृशान् पुत्रांस्त्वत्तोऽहं ब्रह्मवादिनः।**

**नेच्छामि सुदुराचारान् प्रसादं कर्तुमर्हसि।।** (7.9.25)

सदाचारिपुत्रस्य कामना कैकस्याः सत्त्वचरित्रस्य परिचायिका। परन्तु शनैः शनैस्तस्याः सत्त्वचरित्रं रजोगुणेनावृतं भवति। निजपुत्रं रावणं कुबेरापेक्षया महत्तार्थं प्रेरयति–

**दशग्रीव यथा यत्नं कुरुष्वामितविक्रम।**

**यथा त्वमपि मे पुत्र भवे वैश्रवणोपमम्।।** 7.9.43

## कुम्भीनसी

कुम्भीनसीमपहृत्य राक्षसो मधुः परिणयति। परिणामतः कुपितो रावणस्तं हन्तुं दृढ़निश्चयो जातः। कुम्भीनसी पतिप्राणार्थं रावणं प्रार्थयति–

**भयानामपि सर्वेषां वैधव्यं व्यसनं महत्।**

**सत्यवाग्भव राजेन्द्र मामवेक्षस्व याचतीम्।।** (7.25.43)

प्रसङ्गेऽस्मिन् पितृकुलमनादृत्य कुम्भीनस्या मधुना परिणयस्य स्वीकारस्तस्यां प्रवृद्धरजः सङ्केतयति।

## धन्यमालिनी

धन्यमालिनी राक्षसीकन्या। सीतातिरस्कृतं निष्फलमनोरथं क्रोधाभिभूतं रावणं रञ्जयितुं यतमाना एषा निवेदयति–



**परिष्वज्य दशग्रीवमिदं वचनमब्रवीत्।**

**मया क्रीड महाराज सीतया किं तवानया।।** (5.22.40)

धन्यमालिन्याः संक्षिप्त एषः प्रसङ्गः सूचयति यद् अन्तःपुरस्य स्त्रियः दुर्मतिं रावणं सीताया वारयितुमिच्छन्ति स्म। प्रसङ्गेऽस्मिन् धन्यमालिन्या राजसिकं चरित्रं प्रकटीभवति।

एकजटा, हरिजटा, विकटा, दुर्मुखी, विनता, विकटा, चण्डोदरी, प्रघसा, अजामुखी, शूर्पणखा इत्येताः सर्वाः परवशा रावणस्याज्ञापालिताः प्रहरिण्यः। सामदानभेदद्वारा सीताया मनोबलं ह्रासयितुमेता यतमाना रावणेन नियुक्ताः। एता वचोभिराहारेण च रजस्तमोभ्यामुपेताः प्रतीयन्ते।

एकाक्षी, एककर्णा, कर्णप्रावरणा, गोकर्णी, हस्तिकर्णी, लम्बकर्णी, अकर्णिका, हस्तिपदी, अश्वपदी, गोपदी, पादचलिका, एकाक्षी, एकपादी, पृथुपादी, अपादिका, अतिमात्रशिरोग्रीवा, अतिमात्रकुचोदरी, अतिमात्रास्यनेत्रा, दीर्घजिह्वानखा, अनासिका, सिंहमुखी, गोमुखी, सुकटीमुखी।

एताः सर्वा राक्षस्यः सीतां प्रेरयितुं रावणेनादिष्टाः– **यथा मद्वशगा सीता क्षिप्रं भवति जानकी।** (5.22.36)

**तथा कुरुत राक्षस्यः सर्वाः क्षिप्रं समेत्य वा।**

**प्रतिलोमानुलोमैश्च सामदानादिभेदनैः।** (5.22.37)

**आवर्जयत वैदेहीं दण्डस्योद्यमनेन च।**

**इति प्रति समादिश्य राक्षसेन्द्रः पुनः पुनः।** (5.22.38)

इतोऽधिकं नैतासां प्रसङ्ग उपलभ्यते।

भया– राक्षसस्य हेतेः पत्नी।

देववती– गन्धर्वकन्या, राक्षससुकेशस्य भार्या।

सुन्दरी– राक्षसमाल्यवतोः भार्या।

अनला– माल्यवत्सुन्दर्योः पुत्री।

केतुमती–राक्षससुमालेः पत्नी।

वसुदा- राक्षसमालेः पत्नी।

कुम्भीनसी-अनलायाः पुत्री।

राका, पुष्पोत्कटा, कुम्भीनसी-एताः सुमालीपुत्र्यः।

वज्रज्वाला-कुम्भकर्णस्य पत्नी।

रामायणे राक्षसाणां वंशक्रमे एतासां नामोल्लेखः। इतोऽधिकं नैतासां चरित्रमुपलभ्यते।

निष्कर्षतः, सर्वेषामात्मिकविकासाय सत्त्वप्रवृद्धिरपेक्ष्यते। गुणत्रयप्रवृद्धौ बाह्याभ्यन्तरकारणानां भूमिका महत्त्वपूर्णा। अभ्युदयाकाङ्क्षिणः प्रतिकूलतायामपि उन्नतिं प्राप्नुवन्ति त्रिजटा-सरमा-मन्दोदरीवत्। पराभवकामिनोऽनुकूलतायामपि अवनतिमधिगच्छन्ति कैकसीशूर्पणखाताटकावत्। जीवाः स्वयमेव त्रिगुणैः सह बध्यन्ते सङ्गवशात्। यथोक्तं गीतायाम्-

**पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्।**

**कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु।।** (गीता 13.21)

❖



# फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

ह. गोपबन्धु मिश्रः
सम्पादकः